डिसेम्बर् 2006 Rs. 13 /-

संस्कृत चन्दमामा

आ षष्टेः वर्षेभ्यः विज्ञानविनोदयोः प्रकाशयित्री प्रसारयित्री च विशिष्टा पत्रिका


TEST YOUR IQ
Which type of mosquitoes eat other mosquitoes?
A 11th century temple has no deity, no idol, no worship! Where is it located?
A temple archway has the tales from the Panchatantra sculpted on it. Where will you go to see them?
Which dog lived the longest in history?
Who or which will you associate with when you are told about Fragonia?
Someone cut off his right hand with his left hand and went for his last battle (against the British army). Who was it?
Where is Asia's largest Rose Garden located?
What is the difference between Julemanden and Joulupukki?
If you feel you are stumped, don't worry, you'll get all the answers in Junior Chandamama December 2006 issue. Go, grab a copy!
Junior
CHANDAMAMA
THE ONE-STOP COMPLETE FUN AND ACTIVITY MAGAZINE
NOW AVAILABLE AT YOUR NEAREST NEWS STAND FOR
RS.15 PER COPY
PAY ONLY RS.150 FOR ANNUAL SUBSCRIPTION AND SAVE RS.30
For Further Details write to :
CHANDAMAMA INDIA LTD.,
82, Defence Officer's Colony,
Ekkatuthangal, Chennai - 600 097.
Junior
THE LEGEND BEHIND THE CHRISTMAS TREE

चाल्यतां खड्गः चिकनगुन्या, डेङ्गे इत्येतौ असुरौ विरुध्य...

CHANDAMAMA INDIA LTD. * LIBRARY * CHENNAI-97
Dec. 06

विभिन्नजातीयाः मशकाः अभिज्ञायन्ते तत्तन्नाम्ना इति किं भवन्तः जानन्ति ?

अयीडेस्मशकाः एव पूर्वोक्तयोः रोगयोः कारणभूताः । ते बालान्, तरुणान्, वृद्धान्, महिलाः च दंशनेन पीडयितुम् अर्हन्ति ।

* 'अयीडेस् ईजिप्टी'कुलीयाः मशकाः रोगाणूनां प्रसारं कुर्वन्ति ।

क्रियतां सङ्घर्षः आत्मरक्षणाय !!

१. यत् वस्त्रं समग्रं शरीरम् आवृणुयात् तादृशम् एव वस्त्रं ध्रियताम् । यावच्छक्यं शरीरस्य निरावरणता निवार्यताम् ।
२. यदि मशकनिवारकाणां लेप्यानाम् उपयोगः सम्मतः, तर्हि रात्रौ शयनसमये अनावृते भागे तस्य लेपनं क्रियताम् ।
३. मशकनिवारकं जालं प्रसार्य शयनम् एव प्रशस्तम् ।
४. गृहे मत्स्यालयः किम् अस्ति ? तर्हि तत्रत्यस्य जलस्य परिवर्तनम् आधिक्येन क्रियताम् । दिनद्वये दिनत्रये वा सकृत् जलस्य परिवर्तनम् अवश्यं भवेत् ।
५. जलागारं पिहितं भवतु इति ज्येष्ठाः स्मार्यन्ताम् । यत्र जलसङ्ग्रहः स्यात् तत्र आवरणम् अवश्यं भवेत् ।
६. पेयं जलं शीतके दिनद्वयात् अधिकं कालं यावत् मा स्थाप्यताम् । दिनद्वये एकवारं तत्रत्याः जलकूपीः रिक्तीकृत्य सम्यक् प्रक्षाल्य तासु नूतनं जलं पूर्यताम् ।
७. गृहस्य प्रकोष्ठानाम् अध्ययनप्रकोष्ठादीनां च स्वच्छता परिरक्ष्यताम् । अनपेक्षितानि वस्तूनि क्षिप्यन्ताम् । यतः मशकानां सन्तानस्य उत्पत्तिः तेषु एव भवितुम् अर्हति ।

भारतस्य बालानां स्वास्थ्यम् अभिलक्ष्य भवतां पत्रिकया प्रकाश्यमानम् अस्ति एतत् ।

चन्दमामा सम्पुटः - २२ डिसेम्बर् - २००६ सञ्चिका - १२

एतस्य अङ्कस्य विशेषाः

श्रेष्ठतरं सौन्दर्यम् (वे.क.) ...१९

गुजरातराज्यीया जानपदकथा ... २६

महापुरुषाणां जीवन-घटना ...४२

रामायणम् - ११ ...४९

अन्तरङ्गम्

- ★ वाचकानां पुटोऽयम् ...६
- ★ पिशाचाभ्यां कारितः विवाहः ...७
- ★ मधुनः बिन्दुतः ...१२
- ★ भयङ्करः खातः - १४ ...१३
- ★ भारतदर्शनम् ...२५
- ★ नूपुरस्य झणत्कारः ...२६
- ★ वार्ताविशेषः ...३०
- ★ गोलाकारिकायाः शिलायाः कथा ...३१
- ★ साहित्यकदम्बः ...३४
- ★ चन्दमामाप्रश्नावली - ११ ...३६
- ★ गुजरातीया जानपदकथा ...३७
- ★ अमूल्यं स्मारकम् ...४४
- ★ जातककथा ...४६
- ★ परबुद्धिः विनाशाय ...५५
- ★ पलायनकारणम् ...५८
- ★ अपराजेयः गरुडः - ८ ...५९
- ★ भारतस्य सांस्कृतिकः विशेषः ...६३
- ★ पुटोऽयं भवताम् ...६४
- ★ चित्रशीर्षिकास्पर्धा ...६६

SUBSCRIPTION

For USA and Canada
Single copy $2
Annual subscription $20

Remittances in favour of Chandmama India Ltd.
to
Subscription Division
CHANDAMAMA INDIA LIMITED
No. 82, Defence Officers Colony
Ekkatuthangal,
Chennai - 600 097
E-mail :
subscription@chandamama.org

चन्दमामाप्रश्नावली - ९ (अक्टोबर् - २००६)

संस्कृतचन्दामामावाचकेषु केनापि समुचितम् उत्तरं न प्रेषितम् इत्यतः वयं कस्मैचिदपि पारितोषिकं यच्छन्तः न स्मः । वाचकानां ज्ञानाय नवम्याः प्रश्नावल्याः उत्तरम् अधः प्रकाशयन्तः स्मः । सर्वे वाचकाः एतस्यां प्रश्नावलीस्पर्धायां सोत्साहं भागं वहेयुः इति अस्माकम् अभ्यर्थना ।

© The stories, articles and designs contained in this issue are the exclusive property of the Publishers. Copying or adapting them in any manner/ medium will be dealt with according to law.

संस्थापकौ –
चक्रपाणिः, बि. नागिरेड्डिः च

परिसरस्वच्छताविषये बद्धादरता स्यात्

एषु दिनेषु उभौ शब्दौ आधिक्येन श्रूयेते – चिकनगुन्या डेङ्गे चेति । उभयम् अपि ज्वरयोः नाम । गतात् मे-मासात् एतयोः पीडा भारते दृश्यमाना अस्ति । 'चिकनगुन्या' इत्येतत् आफ्रिकादेशस्य वृक्षविशेषस्य नाम, यश्च वक्रगत्या वर्धते । एतेन रोगेण ग्रस्ताः अपि ऋजुतया स्थातुम् अशक्नुवन्तः अवनतपृष्ठाः भवन्ति । डेङ्गेज्वरश्च विषाणुजीविनां कारणतः उत्पद्यते । देशे जातानि संशोधनानि ज्ञापयन्ति यत् एतौ ज्वरौ मशकदंशनात् उत्पद्येते इति । मशकानां सन्तानोत्पत्तिः प्रसारः च अवरुद्धः चेत् एव एतयोः रोगयोः निवारणं शक्यम् ।

सर्वतोमुखं चिन्तनं ज्ञापयति यत् एतस्य मूलापराधः अस्माकम् एव इति । परिसर-स्वच्छताविषये अनादरः, गृहे अनपेक्षितानां रोगकारणानां वस्तूनां सङ्ग्रहः च एतस्य रोगस्य उत्पत्तौ मूलं कारणम् । नगरेषु मलिनवसतयः बहुधा दृश्यन्ते । तत्र मलिनजलं सङ्गृहीतं भवति । ततश्च भवति रोगप्रसारः । रोगप्राप्त्यनन्तरं चिकित्साविषये चिन्तनात् अपि रोगः एव यथा न प्राप्येत तथा चिन्तनं वरं खलु ? किन्तु नीतिरेषा पुस्तकमात्रे दृश्यते । वयम् एतद्विषये 'सर्वकारं' निन्दामः । सर्वकारः नाम कः ? अस्माभिः एव चिताः प्रतिनिधयः एव तस्य अङ्गानि ।

वयं स्वकर्तव्यं कदापि न विस्मरेम । परिसरस्वच्छताविषये बद्धादराः स्याम । परिसरस्वच्छतायाः संरक्षणं तद्वासिनां गुणवत्तां यथा, तथैव तेषां स्वास्थ्यस्थितिम् अपि द्योतयति ।

सम्पादकः - विश्वम्

Visit us at: http://www.chandamama.org

वाचकानां पुटोऽयम्

अहं १९६५ तमात् वर्षात् चन्दमामायाः ग्राहकः अस्मि । १९८४ तमात् वर्षात् अहं चन्दमामायाः लेखकः अपि अस्मि । पूर्वं सन्ध्याकाले पितामह्या सह गृहस्य पुरतः वितर्दिकायाम् उपविश्य चन्दमामां यत् पठामि स्म तत् इदानीम् अपि मम स्मृतिपथे अस्ति । सुखदः अनुभवः सः । चन्दमामायां मम प्रथमा कथा यदा प्रकाशिता अभवत् तदा प्राप्तः आनन्दः तु अवर्णनीयः । चन्दमामया वाचकत्वेन कथालेखकत्वेन च मम प्रोत्साहनं बहुधा कृतम् अस्ति ।

चन्दमामायाः पठनं संस्कृतिपरिरक्षणतुल्यम् । किञ्चित्कालं चन्दमामायाः प्रकाशनं यदा स्थगितम् आसीत् तदा भासते स्म यत् 'जीवनदी' विलुप्ता जाता इति । भगवतः कृपया सा च जीवनदी अद्य प्रवहन्ती दृश्यते ।

रामायणकाले बालकः रामः चन्दमामं प्राप्तुम् इच्छन् यदा रोदनम् अकरोत् तदा राजा दशरथः दर्पणे चन्दमामं दर्शयन् पुत्रं तोषितवान् इति कथा श्रूयते । यदि तादृशी घटना अद्य प्रवृत्ता स्यात् तर्हि 'चन्दमामा'पत्रिकायाः दानात् पुत्रस्य तर्पणं कृतम् अभविष्यत् प्रायः । चन्दमामः आकाशस्य भूषणं, चन्दमामा च भूमेः आभरणम् । मम हार्दा इच्छा अस्ति यत् एषा चन्दमामा प्रकाशं विकिरन्ती अद्वितीयतां रक्षेत् इति ।

– रामानन्दशर्मा, पाटना

अहं चन्दमामां आ १९५६ तमात् वर्षात् जानामि । तदा तस्य मूल्यम् आसीत् ६० पैसात्मकम् । वेताल-बोधिसत्त्व-मान्त्रिकादिकथाः पौराणिककथाः च भवन्ति स्म तत्र । महती आकर्षकता भवति स्म । अद्यापि बालानां तोषकरी पत्रिका एषा एका एव । पूर्वं प्रश्नस्पर्धादयः न भवन्ति स्म । अद्य ताः बालान् चिन्तनाय प्रवर्तयन्त्यः पठने प्रेरयन्ति । पूर्वं पृष्ठसङ्ख्याः अधिकाः भवन्ति स्म । शङ्करस्य चित्राणि चित्तम् आकर्षन्ति स्म । चन्दमामा सदा स्वप्रभां प्रसारयन्ती भवतु ।

– बालकृष्णः, मेरठ

अगस्टमासस्य चन्दमामायाः दर्शनात् महान् सन्तोषः प्राप्तः । कथानां प्राधान्यं विशेषतः आनन्ददायकः । दीर्घकालस्य अनन्तरं वीर-सीतारामादीनां चित्रकाराणां चित्राणि दृष्टानि तत्र । एतस्मात् तु मम सन्तोषः इतोऽप्यधिकः जातः ।

– वै. गोपालः, हैदराबाद

पिशाचाभ्यां कारितः विवाहः

विमातुः सुमित्रातः कृष्णवेणी अनेकानि कष्टानि अनुभूतवती । यदा सा विंशतिवर्षीया आसीत् तदा विषमज्वरस्य कारणतः तस्याः पिता दिवं गतः आसीत् । विमाता तु प्राप्तवयस्कायाः अपि तस्याः विवाहं सर्वथा न इच्छति स्म । 'विवाहानन्तरं यदि एषा पतिगृहं गच्छेत् तर्हि अत्र गृहकार्याणि कः निर्वहेत् ?' इति चिन्तनं तस्याः । किन्तु 'कृष्णवेण्याः विवाहम् अकृत्वा यदि औरसपुत्र्याः विवाहः निर्वर्त्येत तर्हि जनाः निन्देयुः' इति भीतिः अपि ।

अतः एव सा जनान् सदा वदति स्म - ''विवाहानन्तरं वर्षाभ्यन्तरे पतिः एतां परित्यज्य गमिष्यति इति ज्योतिषिकैः उक्तम् अस्ति । अतः एव एतां परिणेतुं कोऽपि न उत्सहते'' इति ।

अत्रान्तरे सप्ततिवर्षीयः कश्चन वृद्धः कृष्णवेणीं परिणेतुं सज्जः जातः । सः अवदत् - ''जातकफले मम विश्वासः नास्ति । एषा मह्यम् अरोचत । अतः अहम् एतां परिणेतुं सन्नद्धः अस्मि'' इति ।

तेन वृद्धेन सह कश्चन विवाहघटकः आगतः आसीत् । सः सुमित्राम् एकान्ते अवदत् - ''यदि एषः विवाहः अङ्गीक्रियेत तर्हि अस्माकं स्वामी भवत्यै द्विलक्षं रूप्यकाणि दास्यति । विवाहव्ययम् अपि सः एव निर्वक्ष्यति'' इति ।

''एवं तर्हि कुतो विलम्बः ? दशदिनाभ्यन्तरे एव अहं विवाहं निर्वर्तयिष्यामि । सर्वविधां सज्जतां कृत्वा वार्तां प्रेषयिष्यामि भवद्भ्यः'' इति ससन्तोषम् अवदत् सुमित्रा ।

एतां विवाहवार्तां श्रुत्वा कृष्णवेणी विमातरम् अवदत् - ''अम्ब ! एषः विवाहः सर्वथा न इष्यते मया । आजीवनं कन्यात्वेनैव स्थातुम् अपि अहं सिद्धा । कृपया एतं विवाहं निवारयतु भवती'' इति ।

''किं विवेकः अस्ति भवत्याः ? यावत्

भवत्याः विवाहः न सम्पद्येत तावत् मम पुत्र्याः अपि विवाहः न प्रवर्तेत । यदि एतस्य विवाहस्य विरोधः क्रियेत तर्हि प्राणवियोगः प्राप्तव्यः भवेत् भवत्या'' इति कठोरस्वरेण अवदत् सुमित्रा ।

वृद्धस्य परिणयात् अपि मरणम् एव वरम् इति अचिन्तयत् कृष्णवेणी । अतः तस्याम् एव रात्रौ सर्वैः यदा गाढा निद्रा प्राप्ता तदा सा विना शब्दं ततः निर्गतवती अरण्यं प्रति ।

श्रावणमासः सः । वृष्टिकारणतः मार्गाः पङ्कमयाः आसन् । तथापि तादृशेन एव मार्गेण गच्छन्ती कण्टकानि हस्तेन अपसारयन्ती कृष्णवेणी अरण्यं प्रविष्टवती । तत्र निरन्तर-सञ्चारकारणतः जातस्य श्रमस्य परिहाराय सा कस्यचित् कूपस्य भित्तेः उपरि उपविष्ट-वती ।

तां दृष्ट्वा काचित् पिशाची आत्मना सह स्थितं पिशाचम् अवदत् - ''एषा सुन्दरी तरुणी । महतः कष्टस्य कारणतः एव एषा एवम् अरण्यम् आगतवती स्यात् । एतस्याः किं कष्टम् इति आवां विचारयाव'' इति । ततः तौ कृष्णवेण्याः पुरतः प्रत्यक्षौ जातौ ।

कृष्णवेणी तौ दृष्ट्वा किञ्चिदपि न भीता । प्रत्युत मन्दहासं प्रकटितवती सा । तदा आश्चर्यम् अनुभवन्तौ तौ पिशाचौ पृष्टवन्तौ - ''आवयोः दर्शनात् किं भीतिः न प्राप्यते भवत्या ?'' इति ।

''मरणाय सन्नद्धायाः मम भवतोः दर्शनात् भीतिः कुतः ?'' इति विषादेन अवदत् कृष्ण-वेणी ।

तदा तौ पिशाचौ पृष्टवन्तौ - ''मरणं प्राप्तुं किं भवती आगतवती ? तादृशं किं कष्टम् प्राप्तं भवत्या ?'' इति ।

तदा कृष्णवेणी प्रवृत्तं सर्वं श्रावयित्वा - ''विमाता मां सदा पीडयति । तस्य आसन्न-मरणस्य वृद्धस्य परिणयात् अपि स्वयं मरण-प्राप्तिः वरं खलु ?'' इति अवदत् ।

तस्यां करुणां प्रदर्शयन्ती पिशाची अवदत् - ''असहायायाः एतस्याः नितरां शोचनीया स्थितिः'' इति ।

तदा पिशाचः अवदत् - ''युक्तम् उक्तं भवत्या । आवाभ्याम् एतस्याः साहाय्यं करणीयम्'' इति ।

ततः तौ परस्परं समालोच्य कृष्णवेणीम् उक्तवन्तौ - ''वत्से ! अलं चिन्तया । आवां सुन्दरं योग्यं कञ्चित् तरुणम् अन्विष्य भवत्याः विवाहं निर्वर्तयिष्यावः । आवाभ्यां यथा उच्यते

तथा व्यवहरणीयं भवत्या । किमयं प्रस्तावः अनुमन्येत ?'' इति ।

कृष्णवेणी अङ्गीकारपूर्वकं शिरः चालितवती । ततः तौ पिशाचौ मानवरूपं प्राप्तवन्तौ । एकं शकटं सृष्ट्वा चतुरः वस्त्रबन्धान् चापि तौ सृष्टवन्तौ । तान् वस्त्रबन्धान् शकटे आरोप्य तौ कृष्णवेणीम् उक्तवन्तौ – ''इतः परम् आवां भवत्याः मातापितरौ । अवश्यं स्मर्तव्यम् एतत्'' इति ।

ततः ते शकटम् आरुह्य प्रस्थितवन्तः । मध्येमार्गं प्रवाहपूर्णा काचित् नदी प्राप्ता । अतः प्रयाणं स्थगितम् । तत्र अन्योऽपि शकटः स्थगितः आसीत् । कश्चन युवकः शकटस्य पार्श्वे स्थितः आसीत् । शकटस्य अन्तः त्रयः आसन् । विचारणात् ज्ञातं यत् शकटे स्थिताः युवकस्य माता पिता भगिनी च इति ।

तावता युवकस्य पिता अवदत् – ''कुत्र प्रस्थितं भवद्भिः ? वयं दुर्गपुरवासिनः । कनकपुरे योग्या वधूः अस्ति इति श्रुतम् । तां द्रष्टुं प्रस्थिताः वयम् । कन्यापितरः लक्षशः वरदक्षिणां दातुं सिद्धाः सन्ति बहवः । किन्तु कापि कन्या अस्मत्पुत्राय एतस्मै सूर्याय न अरोचत'' इति ।

एतत् श्रुत्वा पिशाची अवदत् – ''अस्माकं पुत्र्याः कृष्णवेण्याः अपि एतादृशी एव समस्या । एतस्याः सौन्दर्यं दृष्ट्वा आकृष्टाः सन्तः बहवः तरुणाः एतां परिणेतुम् अग्रे आगताः । वरदक्षिणा कापि दातव्या नास्ति इत्यपि उक्तं तैः । किन्तु कृष्णवेण्यै तु तेषु कोऽपि न अरोचत । सद्यः अस्माभिः श्रुतं यत् प्रतापपुरे कोऽपि योग्यः वरः अस्ति



इति । तस्य दर्शनाय प्रस्थिताः वयम् । किन्तु एषा नदी विघ्नाय जाता'' इति ।

''वरदक्षिणाम् अस्वीकृत्यापि कोऽपि तरुणः किं काञ्चित् तरुणीं परिणेतुं सिद्धः भवेत् ? सर्वथा अविवेकिता एषा'' इति अवदत् सूर्यस्य माता ।

सूर्यः एतत् सम्भाषणं शृण्वन् आसीत् । सः मातापितृभ्यां सह सम्भाष्य पिशाचीसमीपम् आगत्य अवदत् – ''वयं भवत्याः पुत्र्याः दर्शने उत्सुकाः स्मः'' इति ।

पिशाची कृष्णवेणीं रथात् अवातारयत् । तस्याः सौन्दर्यं दृष्ट्वा सूर्यः व्यामुग्धः जातः । सूर्यस्य दृढकायतां सौन्दर्यं च दृष्ट्वा कृष्णवेणी लज्जया अवनतशिरस्का जाता ।

एतत् दृष्ट्वा पिशाचः ससन्तोषम् अवदत् – ''बहोः कालात् अनन्तरम् एतादृशः कश्चन

वरः अस्माभिः दृष्टः, यश्च अस्माकं पुत्र्यै अरोचत'' इति ।

''सुन्दर्याः कन्यायाः प्राप्तिमात्रेण विवाहः न प्रवर्तेत । वयम् अपि सुन्दरीं स्नुषाम् इच्छामः । किन्तु वरदक्षिणा अपि आतृप्ति प्राप्येत'' इति अवदत् सूर्यस्य माता ।

सूर्यः कृष्णवेण्याः समीपं गत्वा पिशाचौ अवदत् - ''एषा मम सम्मत्यै जाता'' इति ।

तदा तस्य माता झटिति अवदत् - ''भवतः सम्मत्यै जाता स्यात् नाम एषा । वरदक्षिणा कियती प्राप्येत इत्यपि ज्ञातव्यम् एव खलु अस्माभिः ?'' इति ।

''श्वः भाद्रपदमासस्य आरम्भः । अग्रिमे मासद्वये विवाहमुहूर्तः कोऽपि नास्ति इति श्रूयते । ग्रामपुरोहितेन एतत् ज्ञापितम् अस्ति'' इति अवदत् सूर्यस्य पिता ।

''भाद्रपदमासस्य आरम्भस्य अनन्तरं खलु विवाहमुहूर्तस्य अप्राप्तिः ? उभय-पक्षीयाः वयं सर्वे अत्रैव स्मः एव । अतः अद्य एव विवाहः प्रवर्ततां नाम'' इति अवदत् पिशाची ।

तदा सूर्यस्य माता अवदत् - ''वरदक्षिणा-धनं पुरतः उपस्थितं चेदेव विवाहविषये चिन्तनम्'' इति ।

तदा पिशाचः चतुरः धनस्यूतान् शकटतः आनयत् । तानि सुवर्णनाणकानि दर्शयन् सः अवदत् - ''वरदक्षिणारूपेण यावत् भवती इच्छति तावत् तु अत्र अस्ति एव । तदतिरिच्य अत्रत्येन धनेन एव भोजनव्ययः अपि निर्वोढुं शक्यः'' इति ।

सूर्यस्य माता तान् धनग्रन्थीन् स्वस्य शकटे स्थापितवती । ततः सूर्यः कृष्णवेणी च परस्परम् अङ्गुलीयकविनिमयं कृतवन्तौ । प्रातःकालाभ्यन्तरे तयोः विवाहः विधिवत् सम्पन्नः एव ।

नदीतीरे पर्वतस्य उपरि कश्चन देवालयः दृश्यते स्म । तं दूरात् दृष्ट्वा कृष्णवेणी सूर्यम् अवदत् - ''आदौ आवां तत् मन्दिरं गत्वा आगच्छाव । ततः भवतः ग्रामं प्रति गमनं भवतु'' इति ।

''भवन्तौ तत्र गच्छताम् । ग्रामं गत्वा भोजनादिव्यवस्था करणीया खलु ? अतः आवाम् अग्रे गच्छावः'' इति अवदत् सूर्यस्य पिता ।

''भवतु नाम । आवां भाटकशकटं कञ्चित् प्राप्य आगमिष्यावः'' इति अवदत् सूर्यः ।

ततः सूर्यः कृष्णवेण्याः हस्तं गृहीत्वा तां

नद्याः अपरं तीरं प्रापितवान् । 'यदि वस्तुस्थितिं मम पतिः जानीयात् तर्हि घोरः परिणामः सम्मुखीकरणीयः भवेत्' इति चिन्ता आरब्धा कृष्णवेण्याः मनसि ।

बहुधा विचिन्त्य वस्तुस्थितिकथनम् एव वरम् इति निश्चित्य सा सूर्यम् उद्दिश्य - ''आर्य ! क्षन्तव्या अहम् । वस्तुतः आवयोः विवाहं निर्वर्तितवन्तौ न मम मातापितरौ, अपि तु पिशाचौ'' इति उक्त्वा प्रवृत्तं निवेदितवती ।

अत्रान्तरे पृष्ठभागे महान् कोलाहलः श्रुतः । ''वञ्चना ! महती वञ्चना !! एतेषु ग्रन्थिषु न सन्ति सुवर्णनाणकानि, प्रत्युत सन्ति अस्थिखण्डाः भस्म च'' इति वदन्ती सूर्यस्य माता ग्रन्थिस्थं सर्वं भूमौ पातितवती ।

एतत् श्रुत्वा पिशाची पिशाचः च ताम् उद्दिश्य - ''आवयोः अपि काचित् स्नुषा आसीत् । तया वरदक्षिणा न आनीता इत्यतः आवां तां बहुधा पीडितवन्तौ । ततः आवाभ्यां पिशाचजन्म प्राप्तम् । आवाभ्यां कृतं पापं यदि भवत्या अपि क्रियेत तर्हि भवती अपि पिशाचजन्म प्राप्नुयात् निश्चयेन । पिशाचजन्म प्राप्तव्यम् उत स्नुषया सह उत्तमः व्यवहारः करणीयः इति भवत्या निश्चेतव्यम् । अन्यच्च, एतदत्र स्मर्तव्यं यत् यदि स्नुषा भवत्या पीड्येत तर्हि घोरा विपत्तिः सम्मुखीकरणीया भवेत् इति'' इति उक्त्वा ततः अदृश्यतां गतवन्तौ ।

सूर्यस्य मातापितरौ एतत् श्रुत्वा क्षणं यावत् स्तब्धौ जातौ ।

तावता तत्र उपस्थितः सूर्यः - ''तौ यद्यपि पिशाचौ, तथापि तयोः परोपकारबुद्धिः अस्ति । भवन्तौ तु वरदक्षिणाशाग्रस्तौ सन्तौ पिशाचौ जातौ स्तः । भवद्भ्याम् अपि तौ पिशाचौ एव श्रेष्ठौ'' इति अवदत् ।

''सत्यम् । आवयोः विवेकः सर्वथा नष्टः आसीत् । वरदक्षिणारूपेण पिशाचेन ग्रस्तौ आस्व आवाम् । इदानीं विवेकः प्राप्तः अस्ति आवाभ्याम् । लक्ष्मीसदृशी स्नुषा सौभाग्येन एव प्राप्ता अस्ति । तां प्रीत्या द्रक्ष्यावः आवाम्'' इति अवदतां मातापितरौ ।

मातरि पितरि च जातं परिवर्तनं दृष्ट्वा सूर्यः नितरां सन्तुष्टः जातः । सः प्रीत्या कृष्णवेण्याः हस्तं निपीडितवान् ।

मधुनः बिन्दुतः प्रवृत्ताः घटनाः

प्रतिष्ठानपुरे कश्चन पथिकः मधुपूर्णं घटं स्वीकृत्य गच्छन् आसीत् । कदाचित् प्रमादवशात् स च घटः भूमौ पतितः । मधुनः आस्वादनाय काचित् मधुमक्षिका तत्र आगता । तां खादितुं काचित् गृहगोधिका तत्र उपस्थिता । गृहगोधिकायाः ग्रहणाय कश्चन मार्जारः तत्र आगतवान् । तावता शुनकसहितः कश्चन सैनिकः तत्र आगतः । स च शुनकः मार्जारस्य उपरि अभ्यपतत् । स च मार्जारः कस्यचित् वणिजः आसीत् । सः वणिक् स्वस्य मार्जारस्य उपरि अभिपतितं शुनकं प्रहर्तुम् उद्युक्तः । तदा तस्य संहाराय सैनिकः खड्गम् आकृष्टवान् ।

अत्रान्तरे गृहगोधिका मधुमक्षिकाम् अखादत् । गृहगोधिकां मार्जारः अगिलत् । मार्जारं शुनकः अमारयत् । वणिक् दण्डेन शुनकं प्राहरत् । सैनिकः वणिजः शिरसः छेदनम् अकरोत् । एतद्विरुध्य जनाः क्रोधं प्राकटयन् । जनानां निग्रहाय राजा सैन्यं प्रेषयितुम् उद्युक्तः ।

तदा मन्त्री तम् अवदत् - ''महाराज ! यत् प्रवर्तेत तत् प्रवृत्तम् । मधुपानाय मधुमक्षिकायाः आगमनं, गृहगोधिकया कृतं मधुमक्षिकाग्रहणं, मार्जारेण कृतं गृहगोधिकाभक्षणम् इत्यादयः निसर्गसहजाः । किन्तु सैनिकस्य व्यवहारः असहजः । सः वणिक् तु सज्जनः आसीत् । अतः जनाः सैनिकस्य विरोधं कृतवन्तः । भवान् क्रोधकारणतः इदानीं सैन्यस्य प्रेषणे उद्युक्तः अस्ति । क्रोधः न हि सहजः गुणः । सः मानवं दानवं करोति । क्रोधस्य परिणामः भवति नितरां घोरः'' इति ।

मन्त्रिणः वचनस्य युक्तताम् अवगच्छन् राजा क्रोधम् उपसंहृतवान् ।

(आधारः - ऋषभवसुभागस्य पञ्चतन्त्रस्य कथा)

भयङ्करः खातः

१४

[अरण्ये केशवादिभिः अङ्गरक्षकसहितः ब्रह्मदण्डी मान्त्रिकः आगच्छन् अवलोकितः । तैः ब्रह्मदण्डी युक्त्या एव वृक्षशाखायां बद्धः, तस्य अश्वः गृहीतः च । केशवादयः अश्वारूढाः भूत्वा पलायितवन्तः । ग्रामजनाः तेषाम् अन्वेषणाय प्रस्थितवन्तः । अरण्यवासिनां नायकः तेभ्यः अभयं दत्त्वा, गुहायां सुरक्षितस्थानं प्रति तान् नीतवान् । तदनन्तरम्...]

केशवः, जयमल्लः, वृद्धः, वनवासिनायकः च घण्टां यावत् चलित्वा तत्र प्राप्तवन्तः, यत्र अन्धकारे कोऽपि मार्गः न दृश्यते स्म । मार्गम् अलभमानः नायकः गुल्मलतादिकम् अपसारयन् मार्गं कल्पयन् च अग्रे गच्छन् आसीत् । ते त्रयः तम् अनुसरन्तः आसन् । वयं के इति एतेन नायकेन यदि ज्ञायेत तर्हि एषः अस्मान् गृहीत्वा सैनिकेभ्यः समर्पयेत् इति संशयः तान् त्रीन् अपि बाधते स्म ।

'इदानीं ब्रह्मदण्डिनः अपायपरिधेः बहिः आगतम् अस्ति अस्माभिः त्रिभिः अपि । अतः अश्वम् आरुह्य इतः पलायनम् एव वरम्' इति अचिन्तयत् वृद्धः ।

सः केशवं जयमल्लं च तम् एव अभिप्रायं सूचितवान् । किन्तु ताभ्याम् एतत् उचितं न अमन्यत ।

''एतस्मिन् अन्धकारे अस्माकं यात्रा कस्यां दिशि इति न जानीमः चेत् ब्रह्मपुरसमीपम्

एव गच्छेम । तदा विपदः एव सम्मुखीकरणं भविष्यति'' इति केशवेन उक्तम् ।

''अर्धराज्यप्राप्तेः लोभेन एतेन वनवासिना एव द्रोहः यदि चिन्त्येत तर्हि किं वा कुर्याम वयम् ?'' इति अवदत् वृद्धः मन्दस्वरेण ।

तदा केशवः कोशस्थं खड्गम् अङ्गुल्या सूचितवान् । जयमल्लः तूणीरतः बाणं निष्कास्य पूर्ववत् एव स्थापितवान् । पुत्रस्य तन्मित्रस्य च बुद्धिमत्तां, साहसप्रवृत्तिं च ज्ञात्वा वृद्धः मनसि एव हर्षम् अन्वभवत् । 'एतस्मिन् वार्धक्ये ताडनेन मारणेन वा अहं मृतः भवेयं चेदपि अयं मम पुत्रः आपदः, क्लेशान् च सफलतया सम्मुखीकृत्य जीवनं करिष्यति' इति वृद्धस्य विश्वासः दृढः अभवत् ।

सर्वाग्रे वनवासिनायकः गच्छन् कस्यचित् महावृक्षस्य अधः स्थितवान् । सः स्वशूलेन वृक्षस्य काण्डे त्रिवारं ताडनं कृत्वा ध्वनिम् उत्पादितवान् ।

अनुक्षणं वृक्षस्य पृष्ठभागात् शब्दः श्रुतः - ''कः भवान् ? तिष्ठतु'' इति ।

नायकः शूलम् उन्नीय 'महाजङ्गमः' इति द्विवारम् उच्चैः अवदत् । ततः शीघ्रमेव उभौ युवकौ वेगेन आगत्य - ''महाजङ्गमप्रभो ! कः आदेशः अस्माकम् ?'' इति उक्त्वा विनम्रभावेन स्थितवन्तौ ।

''एते त्रयः अपि यात्रिकाः लुण्ठाकेभ्यः भीताः सन्तः अस्मान् शरणं गताः सन्ति । श्वः प्रातःकालपर्यन्तम् एतेषां रक्षणदायित्वम् अस्माकम् अस्ति । भवन्तु पञ्चषाः पर्वतमूलं गच्छन्तु । यतः तत्र ग्रामीणान् विरुद्ध्य अस्मदीयाः युद्ध्यमानाः सन्ति । तत्र किं प्रवृत्तम् इति ज्ञात्वा आगच्छन्तु इत्यपि तान् सूचयतु'' इति उक्तवान् महाजङ्गमः ।

नायकस्य एतम् आदेशं श्रुत्वा तयोः एकतरः वृक्षस्य पृष्ठभागं प्रति धावितवान्, अपरः च केशवादीनां हस्तं गृहीत्वा निकटे स्थितायाः गुहायाः दिशि प्रस्थितवान् ।

केशवः जयमल्लः च सस्यलतादिभिः आवृतां गुहां प्राप्तवन्तौ । वनवासिभिः यत् दत्तं तत् खादितं ताभ्याम् ।

हरिणादिमांसभक्षणसुखम् एतेषाम् अत्र । अपरत्र तु ब्रह्मदण्डी बुभुक्षया अपमानेन च ज्वलन् ग्रामजनान् बहुधा निन्दन् आसीत् । तस्य दुःस्थितिः वर्णनातीता आसीत् ।

''विद्रोहिणाम् आश्रयः तु कल्पितः एव । न केवलं तावत्, राजदूतान् अस्मान् मारयितुम् अरण्यमार्गे ते नियोजिताः अपि ! एतस्मिन्

ग्रामे विद्यमानान् वृद्ध-स्त्री-बाल-पुरुषादीन् सर्वान् अहं भस्मीभूतान् करिष्यामि'' इति वदन् मन्त्रपठनम् आरब्धवान् - ''हूँ हैं फट्... कालभैरव !'' इति । ब्रह्मदण्डिनः मन्त्रपठनं दृष्ट्वा सर्वे चीत्कुर्वन्तः अरण्यतः ग्रामदिशि धावितवन्तः । तेषां हस्ते विद्यमानायाः दीपशिखायाः प्रकाशे केचन खञ्जन्तः आगच्छन्तः दृष्टाः । तेषु केचन व्रणिताः, अन्ये केचन व्रणितान् गृहीत्वा आनयन्तः च आसन् ।

''कुत्र सन्ति ते विश्वासघातकाः ?'' इति उच्चैः अपृच्छत् ब्रह्मदण्डी । तस्य अङ्गरक्षकौ अन्यैः कैश्चित् सह धावतां ग्रामजनानां दिशि धावितवन्तौ । किन्तु ये धावन्ति स्म तेषु ग्रामयुवकाः एव अधिकाः आसन् । सर्वेषां मुखेषु प्रयासशतेन वा प्राणाः रक्षणीयाः इति भावः स्फुटं प्रतीयते स्म । सर्वेऽपि व्रणिताः एव आसन् ।

''ते विद्रोहिणः किं पलायितवन्तः ?'' इति पृष्टवन्तौ जितवर्मा शक्तिवर्मा च ।

''ते न केवलं पलायितवन्तः, अपि तु अस्माकम् उपरि आक्रमणाय वनवासिनः सम्प्रेरितवन्तः अपि । अर्धराज्यस्य अपेक्षा अपि नास्ति अस्माकम् इदानीम् । अस्मदीयाः केचन हताः अपि तैः । भवद्भ्यः भवताम् अर्धराज्याय च भूयांसि नमांसि'' इति अवदन् ग्रामयुवकाः ।

तावति काले ब्रह्मदण्डी तत्र उपस्थितः । केशवः, जयमल्लः, वृद्धः च वेषपरिवर्तनं कृत्वा अस्मान् वञ्चयित्वा धावितवन्तः इति ज्ञातवतः तस्य आक्रोशस्य कापि मितिः एव न आसीत् ।

''भवन्तः ग्रामीणाः एवं भीरवः सन्ति इति न जानामि स्म अहम् । असङ्ख्याकाः भवन्तः त्रीन् विद्रोहिणः ग्रहीतुं न शक्तवन्तः इति तु महते आश्चर्याय'' इति उच्चैः तान् अतर्जयत् ब्रह्मदण्डी ।

ततः सः जितवर्माणं, शक्तिवर्माणं च उद्दिश्य - ''जितवर्मन्, शक्तिवर्मन् ! भवन्तौ अविलम्बेन एव प्रस्थाय अत्र यत् प्रवृत्तं तत् सर्वं महाराजं राजगुरुं च सूचयताम् । ते त्रयः विश्वासघातकाः न ग्रहीष्यन्ते चेत् विन्ध्याचलप्राप्तितः पूर्वम् एव वयं हताः भवेम'' इति अवदत् ।

जितवर्मा, शक्तिवर्मा च परस्परं मुखं दृष्टवन्तौ । तयोः उभयोः अपि भीतिः आसीत् यत् यदि गमनावसरे ते आवां गृह्णीयुः तर्हि का गतिः भवेत् आवयोः ?' इति । तौ

चिन्तारतौ जातौ ।

तयोः अन्तरङ्गं विज्ञाय ब्रह्मदण्डी हुङ्कार-पुरस्सरम् उक्तवान् - ''भवन्तौ मम अङ्गरक्षकौ स्तः । भवतोः विश्वस्य विन्ध्याचलं प्रति यदि प्रस्थानं कुर्यां, तर्हि मम प्राणपक्षी भूतपञ्चके विलीनः भवेत्'' इति ।

''अन्यथा न चिन्त्यताम् आर्य ! एतद्विषये राजगुरुमहाराजयोः त्वरया सूचनम् आवश्यकं किम् इत्यत्र पुनश्चिन्तनं वरम् इति आवयोः आशयः'' इति अवदत् जितवर्मा ।

''किमर्थं नास्ति तावती आवश्यकता ? तान् त्रीन् स्वच्छन्दं भ्रमणार्थं त्यजामः चेत् वयं कथं प्राप्नुयाम विन्ध्याचलम् ? ते सैनिकानाम् अपेक्षया क्रियाशीलाः, कार्य-कुशलाः, साहसिनः च इत्यत्र नास्ति सन्देहः । अस्माकम् अग्रिमा योजना तैः ज्ञाता अस्ति । अतः ते यदाकदाचिदपि अस्मान् हत्वा भयङ्करखातस्य निधेः स्वामित्वं सम्पादयितुं यतेरन् । पश्यन्तु एव अस्मासु तैः अस्माकम् अश्वाः अपहृताः । एतत्सर्वं राजगुरुं सूचयामः चेत् सः तेषां बन्धनं कारयेत् खलु अवश्यम् ? एतत् कार्यं यावच्छीघ्रं सम्भवेत् तावान् लाभः अधिकः'' इति अवदत् ब्रह्मदण्डी ।

धनाशां प्रदर्श्य पञ्चषाणां ग्रामयुवकानां ग्रहणे कथञ्चित् सफलौ जातौ जितवर्म-शक्तिवर्माणौ । तैः ग्राम्ययुवकैः सह तौ ब्रह्मपुरं प्रति प्रस्थानं कृतवन्तौ । तैः यावत् किञ्चिद्दूरं गतं तावता एव ब्रह्मदण्डी धावन् तेषां समीपम् आगत्य जितवर्मणः स्कन्धे हस्तं संस्थाप्य उक्तवान् - ''जितवर्मन् ! भवान् शक्तिवर्मणा सह इतः गच्छति चेत् अहम् अत्र एकाकी भविष्यामि । भवतोः अनुपस्थितिं ज्ञात्वा ते मम शिरश्छेदं कुर्वन्ति चेत् का गतिः भवेत् मम ? अतः भवान् अत्रैव तिष्ठतु, शक्तिवर्मा

गच्छतु नाम ब्रह्मपुरं प्रति'' इति ।

जितवर्मा शक्तिवर्मा च परस्परं सम्भाषणं कृत्वा निर्णयं कृतवन्तौ यत् जितवर्मा ब्रह्मदण्डिना सह तिष्ठेत् इति । दशभिः ग्राम्यजनैः सह शक्तिवर्मा प्रस्थानं कृत्वा अनन्तरदिनस्य प्रातःकाले एव ब्रह्मपुरं प्राप्य राजगुरुणा मिलितवान् ।

कञ्चिदपि प्रसङ्गम् अविहाय प्रवृत्तं सर्वं राजगुरुं श्रावितवान् शक्तिवर्मा । राजगुरुः सर्वं सावधानेन मनसा श्रुत्वा - 'ते त्रयः अपि मम प्रयासं निरर्थकं कर्तुम् उद्युक्ताः सन्तः कण्टकायन्ते । भयङ्करखातस्य निधिं प्राप्तुम् इच्छन्ति ते । मान्त्रिकस्य संशयः समीचीनः एव । तस्य शिष्यः अपि किञ्चिदिव मन्त्रतन्त्रादिकं जानीयात् । ब्रह्मदण्डिनः समग्रं रहस्यम् अपि जानीयात् सः । अतः ते कथमपि ग्रहीतव्याः एव' इति निर्णीय सेनापतये वार्ता प्रेषितवान् - 'त्वरया आगन्तव्यम्' इति ।

अल्पे एव काले सेनापतिः राजगुरोः समक्षम् आगतवान् । तदा राजगुरुणा उक्तम् - ''अरण्ये ब्रह्मदण्डी मृत्युमुखं प्रविश्य बहिः आगतः इव । एतेन स्पष्टं यत् ते त्रयः दुष्टाः अस्मद्राज्यसीमायाम् एव सन्ति इति । सर्वासु दिक्षु अपि सैनिकाः प्रेष्यन्ताम् । तान् ग्रहीतुं सर्वविधाः अपि प्रयासाः भवन्तु । सीमासैनिकान् अपि जागरूकान् करोतु । तौ दुष्टौ क्षत्रियवेषेण, वृद्धः साधुपरिधानेन च भ्रमन्तः सन्ति । वृद्धेन मणिमालाः अपि धृताः सन्ति'' इति ।

सेनापतिः राजगुरोः अनुज्ञां प्राप्य निर्गतवान् । अविलम्बेन एव सैनिकाः गणशः



विभक्ताः सन्तः अरण्यशोधनं कर्तुं प्रस्थिताः । प्रतिसमूहम् अपि विंशतिः सैनिकाः आसन् । सेनापतिः आत्मना सह पञ्चविंशतिं सैनिकान् नीतवान् तान् द्रोहिणः ग्रहीतुम् ।

रात्रौ यत्र वासः कृतः आसीत् तस्याः गुहायाः बहिः आगत्य वृक्षच्छायायाम् उपविष्टवन्तः केशवः, जयमल्लः, वृद्धः च । तेषां त्रयाणां पुरतः सिंहचर्मणा आच्छन्नायाः पीठिकायाः उपरि महाजङ्गमः उपविष्टः आसीत् । केशवादयः स्वयात्राम् अधिकृत्य सम्भाषणं कुर्वन्तः आसन् ।

तावता वृक्षाणां मध्यतः उभौ वनवासियुवकौ व्याकुलौ सन्तौ तत्र आगतवन्तौ । महाजङ्गमः आश्चर्येण तौ पश्यन् पृष्टवान् - ''किं प्रवृत्तम् ?'' इति ।

आगतौ तौ युवकौ केशवं जयमल्लं च

संशयदृष्ट्या दृष्ट्वा - ''प्रभो ! किञ्चित् एकान्ते निवेदनीयम् अस्ति'' इति उक्तवन्तौ । एतत् श्रुत्वा महाजङ्गमः पीठिकातः उत्थाय तयोः समीपं गत्वा ताभ्याम् उक्तम् अशृणोत् । ततः केशवादीन् सकृत् तीक्ष्णदृष्ट्या दृष्ट्वा शिरः कम्पयन् तेषां निकटम् आगन्तुम् उद्युक्तः अभवत् ।

'कापि आपत् आपतन्ती अस्ति' इति ज्ञातवान् केशवः । तावता जयमल्लः वृद्धः च कोषात् खड्गं निस्सारयितुं सिद्धौ अभवताम् । एतत्सर्वं विलोक्य महाजङ्गमः मृदु हसन् - ''भवतां साहसं श्लाघनम् अर्हति । भवतां वास्तविकी स्थितिः अवगता मया । ब्रह्मपुरस्य सेना भवतः त्रीन् अन्वेष्टुम् उद्युक्ता अस्ति । भवन्तः न हि क्षत्रियाः, न वा साधारणाः यात्रिकाः । राजद्रोहिणः भवन्तः राज्ञः शत्रवः एव'' इति उक्तवान् ।

''अर्धराज्यं प्राप्येत इति लालसया भवान् शरणागतान् अस्मान् किं शत्रुहस्तगतान् कुर्यात् ?'' इति अपृच्छत् केशवः ।

तदा महाजङ्गमः उच्चैः हसन् उक्तवान् - ''अर्धराज्यं किं, समग्रं ब्रह्मपुरं दीयेत चेदपि अहं तत् स्वीकर्तुं सर्वथा न सिद्धः । मम का आवश्यकता राज्यस्य ? एतत् अरण्यम् एव मम राज्यम् । अस्माकं वनवासिनः एव मम प्रजाः । भवन्तः सत्वरं वनवासिवेषं धरन्तु । अस्मदीयाः भवतः त्रीन् अपि राज्यसीमातः बहिः प्रापयिष्यन्ति'' इति ।

नायकस्य अयं निर्णयः तेषां सन्तोषाय अभवत् । तैः महाजङ्गमाय धन्यवादाः समर्पिताः । तेन दत्तं हरिणचर्मवेषं धृत्वा शिरसि द्वित्राणि पिच्छानि योजयित्वा ते स्ववस्त्राणि बन्धरूपेण बद्ध्वा स्कन्धे आरोप्य ततः प्रस्थितवन्तः ।

महाजङ्गमः वनवासियुवकौ आहूय अवदत् - ''प्रथमम् अरण्यमार्गेषु अश्वान् सवेगं धावयन्तु । तदनन्तरम् एतान् अस्मदतिथीन् राज्यसीमातः बहिः प्रापयन्तु । प्राणान् पणीकृत्य एतत् कार्यं साधनीयम्'' इति ।

एतत् अङ्गीकृत्य तौ युवकौ अश्वान् ततः प्रेषितवन्तौ । अरण्यवेषं धृतवन्तः केशवः जयमल्लः वृद्धः च सीमाम् उल्लङ्घ्य बहिर्गन्तुम् इच्छन्तः ततः ताभ्यां सह प्रस्थितवन्तः ।

- *(अनुवर्तते)*

वेताल-
कथा

श्रेष्ठतरं सौन्दर्यम् ।

सङ्कल्पितं यावत् साधितं न भवेत् तावत् निद्राहारादिकम् अपि न स्वीकरोमि इति निर्णयं कृतवान् इव त्रिविक्रमः पुनः अपि वृक्षस्य समीपं गत्वा शाखायां लम्बमानं शवं स्कन्धे आरोप्य मौनेन यथापूर्वं श्मशानदिशि प्रस्थितवान् । तदा शवस्थः वेतालः - ''महाराज ! लक्ष्य-साधनार्थं कार्ये श्रद्धा, निरन्तरः परिश्रमः च आवश्यकः । एतत् उभयम् अपि भवति प्रभूतं दृश्यते । किन्तु मानवस्य परिश्रमः तदा एव सार्थकः भवति यदा भाग्यम् अपि अनुकूलकरं भवेत् । भाग्यस्य आनुकूल्यम् अस्ति चेदेव लक्ष्यप्राप्तिः अपि भवेत् । आश्चर्यं नाम केचन दैवे अनुकूले सत्यपि, सफलतायां हस्त-

गतायाम् अपि अविवेकेन व्यवहृत्य फल-प्राप्तितः वञ्चिताः भवन्ति । एतद्विषये भवन्तं जागरूकं कर्तुम् अहं कस्यचित् कृषिक-युवकस्य कथां श्रावयामि । श्रूयातां सावधानेन मनसा'' इति उक्त्वा कथाम् आरब्धवान् -

साकेतपुरी भूस्वामिनः आधीन्ये स्थितः कश्चन ग्रामः । तस्मिन् ग्रामे दिलीपः नाम कश्चन सम्पन्नकृषकस्य पुत्रः आसीत् । पितुः वृत्तौ तस्य आसक्तिः न आसीत् । किन्तु हस्तकलासु तस्य विशेषज्ञानम् । सकृत् वीक्षणं क्रियते चेत् तत् ज्ञातं भवति स्म तेन । तादृशः सकृद्ग्राही सः मृदा अपि उत्तमाः मूर्तीः रूपयति स्म । तस्य हस्तं गतः वेणुखण्डः क्षणाभ्यन्तरे एव नादं करोति स्म ।

किञ्चन सुन्दरं प्राकृतिकं दृश्यम् अव-लोकितं चेत् तस्य प्रतिरूपं यावत् न अङ्क्यते तावत् भोजनम् अपि न स्मर्यते स्म तेन । एकलव्यः इव स्वयम् एव सः एतादृशं कौशलम् आत्मसात् कृतवान् आसीत् ।

अथ कदाचित् साकेतपुर्याः भूस्वामिना निश्चितं यत् पुत्र्याः मणिमालायाः अष्टादशः जन्मदिनोत्सवः महता वैभवेन आचरणीयः इति । तदर्थं सज्जता अपि आरब्धा । भूस्वामी घोषणां कारितवान् यत् एतस्मिन् मङ्गलावसरे सर्वैः उपस्थाय पुत्र्याः श्रेयः आशंसनीयम् इति । साकेतपुरीवासिनः दिलीपं निवेदितवन्तः यत् एतस्मिन् अवसरे मणिमालायाः कृते अपूर्वं कलाखण्डं निर्माय उपायनरूपेण ददातु, तत् च उपायनं सर्वोत्तमम्, अत्याकर्षकं च भवेत् इति ।

तादृशम् उपायनं किं भवितुम् अर्हति इति बहुकालं चिन्तयित्वा दिलीपः निर्णीतवान् यत् रक्तचन्दनेन सिंहासनं निर्माय समर्पयामि इति । तदनन्तरदिने एव सः रक्तचन्दनदारूणि आनायितवान् । सिंहासनस्य हस्तौ राजहंस-पक्षाकृत्या, पादाः च नृत्यभङ्गीयुक्तानां हरिणानाम् आकृत्या च उत्कीर्णाः तेन । ऊर्ध्व-भागे मणयः तेन संयोजिताः । सुन्दरीणां लतानां वेष्टनम् अपि चित्रितम् । सिंहासनस्य सज्जीकरणानन्तरम् अवशिष्टेन काष्ठेन सुन्दर्याः ललनायाः काचित् मूर्तिः अपि तेन निर्मिता । एषा मूर्तिः अत्यन्तम् आकर्षिका सती द्रष्टॄणां चित्तं हरति स्म । अतः दिलीपः तां स्वस्य कृते एव रक्षितवान् । शाटिका-वेष्टनेन, आभूषणधारणेन, ललाटे तिलकस्य धारणेन च तां मूर्तिम् अलङ्कृतवान् सः ।

चन्दनसिंहासनं मूर्तिं च दृष्ट्वा जनाः

दिलीपस्य श्लाघनं बहुधा कृतवन्तः । मणिमालायाः जन्मदिने उपायनरूपेण सिंहासनं समार्पयत् दिलीपः । चित्ताकर्षकं तत् सिंहासनं प्राप्य मणिमाला नितरां सन्तुष्टा भूत्वा - ''एतस्य निर्मातारं कलाकारम् अहं द्रष्टुम् इच्छामि'' इति पितरम् अवदत् । भूस्वामिना दिलीपः आनायितः ।

दिलीपः आत्मना सह तां चन्दनमूर्तिम् अपि आनीतवान् आसीत् । मणिमालायै सा मूर्तिः अपि नितराम् अरोचत । कलाकारः दिलीपः तया बहुधा प्रशंसितः ।

तदनन्तरं सा पितरम् उक्तवती - ''तात ! सा मूर्तिः मह्यम् आवश्यकी'' इति ।

''आर्य ! कृपया क्षन्तव्यः अहम् । मदर्थम् एव एषा कलाकृतिः निर्मिता मया, न तु परस्मै दातुम्'' इति निस्सङ्कोचतया अवदत् दिलीपः ।

''एतस्याः मूर्तेः मूल्यं कियत् इति भवान् वदतु । ततोऽपि अधिकम् एव अहं दास्यामि । किन्तु एषा न विक्रीयते इति तु न वक्तव्यम्'' इति अवदत् भूस्वामी ।

''महाशय ! एषा मूर्तिः मम प्राण-समाना अस्ति । अतः कस्मैचिदपि न दीयते मया एषा'' इति दृढस्वरेण उक्तवान् दिलीपः ।

''निष्प्राणा एषा पाञ्चालिका भवतः प्राणायते किम् ? यदि भवान् इच्छेत् तर्हि अहम् एव भवदीया भवेयम् । एतां पाञ्चालिकां मम हस्तगतां करोतु, मां च परिणयतु'' इति अवदत् मणिमाला । सा दिलीपे अनुरागवती आसीत् ।

''एषा मूर्तिः मम काल्पनिकसुन्दर्याः प्रतिरूपम् । मया एतादृश्याः एव अन्वेषणं

क्रियमाणम् अस्ति । अतः भवत्याः अपेक्षां पूरयितुम् अशक्तं मां क्षाम्यतु कृपया भवती'' इति दिलीपः अवदत् विनयेन ।

तस्य एतादृशेन व्यवहारेण मणिमालायाः अहम्भावः आघातितः जातः । तथापि सा स्वस्य क्रोधस्य अभिव्यञ्जनम् अकृत्वा पितरम् अपश्यत् ।

भूस्वामी पुत्र्याः मनोगतं ज्ञात्वा दिलीपम् अवदत् - ''भवान् अद्वितीयः कलाकारः इत्यत्र नास्ति संशयलेशः अपि । अतः आदौ सहार्दम् अभिनन्दामि भवन्तम् । भवतः कृते षाण्मासिकम् अवधिं कल्पयन् अस्मि । तावति काले भवतः सा काल्पनिकसुन्दरी प्राप्येत । अन्यथा एतां पाञ्चालिकां मम पुत्र्यै समर्प्य तस्याः कथनानुगुणं व्यवहरणीयं भविष्यति भवता । एतत् उभयम् अपि कर्तुं भवान् न

शक्ष्यति चेत् मदधीनक्षेत्रात् भवन्तं बहिर्भूतं करिष्यामि'' इति ।

''भवतु नाम'' इति उक्त्वा दिलीपः स्वकल्पनासुन्दर्याः अन्वेषणार्थं ततः निर्गतवान् । ग्रामं ग्रामं गत्वा बहुधा अन्विष्टं चेदपि तेन तादृशी न कापि दृष्टा, यादृशी तस्य मनसि आसीत् । निराशः सः श्रान्तः भूत्वा चण्डातपे अरण्ये गच्छन् बुभुक्षया शक्तिहीनतां प्राप्य निस्संज्ञः भूत्वा मार्गे एव न्यपतत् । संज्ञां प्राप्य यदा नेत्रोन्मीलनं कृतं तदा सः ज्ञातवान् यत् अहं कस्मिंश्चित् कुटीरे अस्मि इति । शिरः उन्नमय्य सः परितः दृष्टिं प्रासारयत् ।

तस्य पुरतः काचित् सामान्यरूपवती वनकन्या स्थितवती आसीत् । नेत्रोन्मीलनं कृतवते दीलीपाय जलं दत्त्वा सा – ''अरण्ये संज्ञाशून्यः पतितः भवान् दृष्टः अस्माभिः । पर्वतदेव्याः कृपया इदमिदानीम् एव ससंज्ञः जातः अस्ति भवान् । वनजम्बीरस्य जलं मधुमिश्रितं पानीयं च परिणामकारि जातम् इति भासते । तिष्ठतु तावत् । एषाहं पितरम् आह्वयामि'' इति उक्त्वा ततः अधावत् ।

अरण्ये मूलकौषधेन चिकित्सां कुर्वतः वैद्यस्य पुत्री एव सा । तस्याः नाम मङ्गला इति । पुत्र्या सह कुटीरं प्रविश्य तस्याः पिता पुनः दिलीपस्य नाडीं परीक्ष्य – ''महाशय ! भवान् बलहीनः सञ्जातः अस्ति । इतोऽपि चत्वारि दिनानि यावत् अत्रैव वसन् भवान् विश्रान्तिं प्राप्नोतु । एषा मम पुत्री मङ्गला भवतः सेवां करिष्यति'' इति उक्तवान् ।

चत्वारि दिनानि तत्र वासम् अङ्गीकृतवान् दिलीपः । तेषु दिनेषु मङ्गलायाः सर्वान् व्यवहारान् सूक्ष्मतया अवालोकयत् दिलीपः ।

कदाचित् व्याघ्रः कश्चित् व्याधस्य बाणतः कथञ्चित् आत्मानं रक्षित्वा व्रणितः अभवत् । तस्य पादे जातात् व्रणात् रक्तं स्रवति स्म । मङ्गला व्याघ्रस्य चिकित्सां कृत्वा व्रणस्य उपरि औषधलेपनं कृत्वा पट्टिकां बद्धवती ।

एतत् लक्षितवान् दिलीपः – ''एषः क्रूरः मृगः खादेत् इति भीतिः भवत्याः किं नास्ति ?'' इति अपृच्छत् महता आश्चर्येण ।

''न कापि भीतिः मम । एषः क्रूरः इति तु सत्यम् एव । किन्तु बुभुक्षा यदा भवति तदा एव व्याघ्रादयः आक्रमणं कुर्वन्ति । अस्माकं नेत्रयोः दया प्रेम वा दृष्टं चेत् ते हानिं न कुर्वन्ति'' इति हसन्ती अवदत् मङ्गला ।

औषधपत्रपेषण-कषायसज्जीकरणादिभिः पितुः साहाय्यं कुर्वती सा गृहकार्याणि अपि

सम्यक् एव निर्वहति स्म । सा गीतगानपुरस्सरं स्वकण्ठमाधुर्यम् अपि प्रसारयति स्म । यत्र साहाय्यस्य आवश्यकता प्रतीयते तत्र शीघ्रम् एव उपस्थिता भवति स्म सा ।

चतुर्थे दिने ततः निर्गमनसमये दिलीपः प्राणसमानां मूर्तिं तस्यै यच्छन् उक्तवान् - ''भवत्या कृतं साहाय्यं कदापि विस्मर्तुं न शक्नोमि । अतः कृतज्ञतारूपेण अहम् एतां मूर्तिं भवत्यै ददत् अस्मि । कृपया स्वीक्रियताम्'' इति ।

''नैव, मम हार्दिकी इच्छा अस्ति - भवान् अपि पाञ्चालिकासदृशीं सुन्दरीं पत्नीं प्राप्नुयात्, सकुशलं गृहं प्राप्नुयात् च इति'' इति वदन्ती मूर्तिस्वीकरणं निराकृत्य मधुना पूर्णं चर्मस्यूतं तस्मै समर्पितवती मङ्गला ।



''न केवलं भवत्या दीयमानं मधु, अपि तु भवत्याः हृदयम् अपि माधुर्येण पूर्णम् अस्ति । तादृशं भवत्याः हृदयं स्वायत्तीकर्तुम् इच्छामि'' इति हृद्गतं भावं सधैर्यम् उक्तवान् दिलीपः ।

मङ्गला लज्जया अवनतशिरस्का भूत्वा कुटीरस्य अन्तः गतवती । ततः सप्ताहाभ्यन्तरे मङ्गलायाः पिता तयोः विवाहं निर्वर्त्य पुत्रीं दिलीपेन सह प्रेषितवान् ।

सपत्नीकः दिलीपः ततः साकेतपुरीं गत्वा भूस्वामिनः सम्मुखे उपस्थाय उक्तवान् - ''आर्य ! भवतः पुत्री एतां मूर्तिम् इष्टवती आसीत् खलु । कृपया स्वीक्रियताम्'' इति ।

तदा भूस्वामी पृष्टवान् - ''एतस्य मूल्यं कियत् ?'' इति ।

''मया प्रतिफलापेक्षया दीयमानं न एतत् । उपायनत्वेन एव यच्छन् अस्मि'' इति दिलीपः सविनयं निवेदितवान् ।

तस्मिन् एव समये भूस्वामिनः पुत्री मणिमाला तत्र आगतवती । ''किम् एषा व्याधपुत्री एव भवतः काल्पनिकसुन्दरी ? पाञ्चालिकायां विद्यमानस्य सौन्दर्यस्य लेशः अपि एतस्यां नास्ति । मम यावत् सौन्दर्यं ततोऽपि अधिकं सौन्दर्यम् एतस्याम् अस्ति किम् ?'' इति उक्त्वा सा पितरम् उद्दिश्य उक्तवती - ''तात ! एषः दिलीपः पराजयं प्राप्तवान् अस्ति । अतः इतः पाञ्चालिकां स्वीकृत्य एतस्मै घोरं दण्डनं विदधातु'' इति ।

भूस्वामी सकृत् पुत्रीं दृष्ट्वा ततः दिलीपम् उद्दिश्य - ''दिलीप ! क्षन्तव्यः अहम् । मम पुत्र्या यत् अनुचितम् उक्तं ततः अहं नितरां लज्जे । स्वीक्रियन्ताम् एतानि सहस्रं सुवर्ण-

नाणकानि । भवतः विवाहं निमित्तीकृत्य उपायनरूपेण दीयमानम् अस्ति एतत्, न तु पाञ्चालिकायाः मूल्यत्वेन'' इति अवदत् ।

दिलीपः उपायनं स्वीकृत्य भूस्वामिनं प्रणम्य पत्न्या मङ्गलया सह स्वगृहं गतवान् ।

एवं कथां श्रावयित्वा वेतालः उक्तवान् – ''राजन् ! पाञ्चालिकाव्यामोहमात्रेण एव दिलीपः भूस्वामिनः पुत्रीं, तस्य अपारां सम्पदं च निराकृतवान् । अन्ततो गत्वा असुन्दरी, सम्पद्रहिता च काननकन्या परिणीता तेन । एतत् सर्वं तस्य अज्ञानम् एव खलु द्योतयति ? मङ्गलां परिणीतवता तेन साक्षात् स्वग्रामं प्रति गमनं परित्यज्य भूस्वामिनः गृहं प्रति किमर्थं गतम् ? यदि भूस्वामी तस्मै घोरं दण्डनं विहितवान् स्यात् तर्हि मङ्गलायाः विषये अन्याय्यं खलु आचरितम् अभविष्यत् ? भूस्वामी न केवलं दिलीपं क्षान्तवान्, अपि तु उपायनरूपेण द्रव्यराशिम् एव दत्त्वा सत्कृतवान् । एतत् किमर्थम् ? एतेषां मम प्रश्नानाम् उत्तरं जानन् अपि यदि भवान् न वदेत् तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति ।

तदा मौनेन स्थातुम् अशक्तः राजा अवदत् – ''दिलीपः कुशलः कलाकारः, वस्तुस्थितिग्राही चापि । केवलेन बाह्यसौन्दर्येण न किमपि प्रयोजनम् । तेन सह आन्तरिकं सौन्दर्यम् अपि भवेत् । बाह्यं सौन्दर्यं भवेत्, न भवेत् वा, तथापि आन्तरं सौन्दर्यं तु स्यात् एव । मङ्गलायां तदेव दृष्टं दिलीपेन । अतः एव सः तस्याः परिणये मतिं कृतवान् । प्रेम्णा आदरेण च पूर्णं हृदयं बाह्यसौन्दर्यम् अतिशेते । यः अन्येषु आदरवान् न भवति, यस्मिन् च दर्पादिकं अधिकं सः मानवत्वेन परिगणयितुम् अयोग्यः एव । मणिमाला एव अत्र उदाहरणम् । पाञ्चालिकायां स्थितं सौन्दर्यं न हि श्रेष्ठम् इति यदा दिलीपेन ज्ञातं तदा सः तां मणिमालायै निश्शुल्कं दातुम् उद्युक्तः अभवत् । अत्र कारणं तस्य अविवेकः अज्ञानं वा न । भूस्वामिना सः मिलितः यत् तत् तु तस्य निष्कपटतां द्योतयति । अतः भूस्वामिनः अपि भ्रान्तिः अपगता । तेन दिलीपः ससन्तोषं क्षान्तः अपि'' इति ।

एवं वदता राज्ञा मौनभङ्गः कृतः इति कारणेन वेतालः ततः शवसहिततया अदृश्यः भूत्वा वृक्षशाखायां लम्बमानः अभवत् ।

अद्वितीयं वास्तुकौशलम्



आग्रादुर्गं मोगलवंशीयानां शासकानां वैभवस्य प्रतीकम् अस्ति । तेषां शासनस्य उत्तुङ्गस्थितौ चक्रवर्ती शाहजहानः १६३८-१६४८ वर्षयोः मध्ये दुर्गम् एतत् निर्मितवान् । दुर्गं परितः रक्षणदृष्ट्या महाप्राकारद्वयं श्वेतशिलया निर्मितम् । बाह्यप्राकारः ७० पदमितः, अपरः च ३० पदमितः । तयोः मध्ये खाते मकराः भवन्ति, खातप्राकारयोः मध्ये विद्यमाने स्थले व्याघ्राः च भवन्ति स्म । 'दीवान्-इ-आम्' नामके सभागृहे चक्रवर्ती जनसन्दर्शनं करोति स्म । कृष्णशिलया निर्मिते सिंहासने सः उपविशति स्म तत्र । विशिष्टानां जनानां मेलनाय 'दीवान्-ई-खास' नामकं सभागारम् आसीत्, यत्र श्वेतशिलासनं भवति स्म । मल्लिकासौधे आधिक्येन शाहजहानस्य प्रिया पत्नी मुमताजा वसति स्म, या च चतुर्दशं पुत्रं प्रसूय दिवं गता । तदनन्तरवर्षेषु शाहजहानः अत्रैव बन्दीकृतः । अन्तिमेषु दिनेषु च ततः एव यमुनातीरस्थं ताजभवनं पश्यन् सः कालं यापितवान् ।

भवन्तः जानन्ति किम् ?

MAHA LACTO

२४ क्यारट्मानकं सुवर्णम् अपि न हि शुद्धम्, यतः तत्र स्वल्पप्रमाणेन ताम्रं मिश्रितं भवति एव । शुद्धं सुवर्णं तु तथा न भवति । उपकरणानि विना हस्तेन एव तस्य निपीडनादिकं कर्तुं शक्यते ।

nutrine India's largest selling sweets and toffees.

नूपुरस्य झणत्कारः

जयन्तः गङ्गापुरे भूस्वामिकार्यालये कार्यं करोति । सः उत्तमस्वभाववान् बुद्धिमान् च । तत्कारणतः उद्योगप्राप्तेः अनन्तरं स्वल्पे एव काले तेन उत्तमा ख्यातिः सम्पादिता आसीत् । तस्य मातापितरौ ललितपुरनामके ग्रामे निवसतः स्म । पुत्रेण यदा नगरे उद्योगः प्राप्तः तदा तौ ग्रामं परित्यज्य पुत्रेण सह वासम् आरब्धवन्तौ ।

नगरं प्रति आगमनस्य अनन्तरम् अपि जयन्तः ग्रामसम्पर्कं न त्यक्तवान् आसीत् । यदा अवसरः प्राप्यते तदा ग्रामं गत्वा मित्राणां गृहे निवसति स्म सः । ग्रामसम्बद्धाः सर्वाः वार्ताः सङ्गृह्यन्ते स्म तेन ।

कदाचित् दीपावलीपर्वनिमित्तं केषाञ्चित् दिनानां विरामः प्राप्तः तेन । अतः सः मित्रैः सह मेलनाय ललितपुरं गतवान् । ग्रामे महेन्द्रः, शिवदासः, गुणशेखरः, मनोहरः च तस्य आत्मीयाः सुहृदः । जयन्तस्य आगमनात् ते नितरां सन्तुष्टाः । तेषां गृहाणि परस्परं सम्बद्धानि आसन् । जयन्तः चत्वारि दिनानि ग्रामे वसति इत्यतः निर्णीतं यत् एकैकस्मिन् गृहे एकैकं दिनं वासः भवतु इति ।

प्रथमे दिने जयन्तः महेन्द्रस्य गृहम् अगच्छत् । रात्रौ भोजनानन्तरं तौ उभौ अपि बाल्यस्य दिनानि स्मरन्तौ कालं यापितवन्तौ । ग्रामस्य स्थितेः विषये, देशस्य राजनीतिविषये चापि ताभ्यां चर्चा कृता ।

शयनात् पूर्वं महेन्द्रः भक्त्या हनूमतः स्मरणं कृतवान्, राक्षोघ्नमन्त्रं रामरक्षास्तोत्रं च पठितवान् ।

तदा जयन्तः मन्दहासपूर्वकं तम् उक्तवान् – ''दैवभक्तिः भवति विशेषतः प्रवृद्धा इति भाति । किं भवान् विरागी भवन् अस्ति ?'' इति ।

''वैराग्यं न, भयं वर्धमानम् अस्ति । भयस्य निवारणाय एव एते उपायाः । हनूमतः

भयं निवृत्तं भवति इति श्रूयते । अतः एव एतत्सर्वं करोमि'' इति अवदत् महेन्द्रः ।

''किं भयं बाधते भवन्तम् ?'' इति अपृच्छत् जयन्तः ।

''सा च महती कथा । इदानीं तु मध्यरात्रः अतीतः । अतः शयनं करवाव'' इति उक्त्वा शयनं कृतवान् महेन्द्रः । जयन्तः अपि शयनं कृतवान् ।

मध्यरात्रसमये जयन्तेन जागरणं प्राप्तम् । तेन नूपुरस्य झणत्कारः कश्चन श्रुतः । जयन्तः मुखं परिवर्त्य अपश्यत् । महेन्द्रः आच्छादकेन आत्मानम् आच्छाद्य भयेन कम्पमानः मन्त्रं जपन् अस्ति । अल्पे एव काले नूपुरध्वनिः स्थगितः जातः ।

प्रातः महेन्द्रं नूपुरध्वनिविषये अपृच्छत् सः । तदा महेन्द्रः विषादेन अवदत् - ''भवता अपि किं सः ध्वनिः श्रुतः एव ? आ एकस्मात् मासात् मम गृहस्य परिसरे काचित् पिशाची इतस्ततः अटति । प्रतिदिनम् अपि रात्रौ एषा एव बाधा । कदाचित् चिन्तनं भवति - एतत् गृहं त्यजेयम् इति । किन्तु परम्परया प्राप्तस्य गृहस्य परित्यागे क्लेशः । परित्यक्तं चेत् अन्यत्र कुत्र वासः इत्यपि समस्या । पिशाचीतः मोक्षं प्राप्तुं मया भूतवैद्यः आश्रितः । दिग्बन्धनं अपि कारितम् । महान् च व्ययः अपि कृतः । किन्तु इतः किमपि प्रयोजनं न सिद्धम्'' इति ।

''अये, किं पिशाचपीडादिषु भवतः अपि विश्वासः ?'' इति अपृच्छत् जयन्तः ।

''मम विश्वासः अस्ति उत न इत्येतत् गौणम् । नूपुरस्य झणत्कारस्य श्रवणस्य आरम्भः यदा जातः ततः आरभ्य गृहे अशुभ-परम्परा एव जायमाना अस्ति'' इति अवदत् महेन्द्रः ।

''एतद्विषये भवता मित्रैः सह चर्चा किं कृता ? तैः किं कोऽपि परिहारमार्गः न सूचितः ?'' इति अपृच्छत् जयन्तः ।

''तैः सह यदि अहं चर्चां कुर्यां तर्हि ते सर्वे मां भीरुं, मूढविश्वासेन ग्रस्तं, महामूर्खं वा भावयेयुः । मम उपहासं च कुर्युः बहुधा । अतः एव चर्चाकरणे भीतिः मम'' इति अवदत् महेन्द्रः ।

अनन्तरदिने जयन्तः शिवदासस्य गृहे अवसत् । तस्यां रात्रौ अपि तेन नूपुरझणत्कारः श्रुतः एव । अद्यतनः ध्वनिः पूर्वदिनात् अपि स्पष्टः आसीत् ।

अनन्तरदिने प्रातः जयन्तः यदा शिवदासम् एतद्विषये अपृच्छत् तदा शिवदासः अवदत् -

''उच्चैः मा वदतु एतद्विषये । मया मन्दिरस्य अर्चकः पृष्टः । सः वदति – 'महालक्ष्म्याः नूपुरध्वनिः सः । तस्याः प्रवेशे कोऽपि प्रतिबन्धः दृश्यते । विशेषपूजायाः कारणात् स च प्रतिबन्धः अपगतः भविष्यति' इति । अतः एव अहं गुप्तरूपेण पूजां कारयन् अस्मि । महाव्ययकरी अस्ति सा'' इति ।

जयन्तेन प्रतिवचनं किमपि न उक्तम् । तदा शिवदासः प्रार्थयत – ''एतं विषयम् अन्यं कमपि मा वदतु कृपया'' इति ।

जयन्तः तृतीयं दिनं गुणशेखरस्य गृहे अयापयत् । एतस्यां रात्रौ नूपुरध्वनिः समीपतः एव श्रुतः । गुणशेखरस्य जागरणं दृष्ट्वा जयन्तः अपृच्छत् – ''नूपुरस्य झणत्कारः श्रूयते खलु ?'' इति ।

''आम् । गतेभ्यः आ केभ्यश्चित् दिनेभ्यः श्रूयते एषः ध्वनिः । अस्माकं गृहस्य पृष्ठभागे निधिः अस्ति इति भाति । सः भूमितः बहिः आगन्तुम् इच्छति । अतः एव एतादृशः ध्वनिः श्रूयते । तस्य निधेः प्राप्तये मया गृहस्य पृष्ठभागे खननं कारितम् । किन्तु निधिः तु न प्राप्तः'' इति उक्त्वा – ''कृपया भवान् एतम् अंशम् अन्यान् मा वदतु'' इति निवेदितवान् गुणशेखरः ।

जयन्तः अवगतवान् यत् एतैः त्रिभिः अपि नूपुरस्य झणत्कारस्य विषये यत् उच्यते तत्र वास्तविकता नास्ति इति । 'एते त्रयः अपि स्वमत्यनुगुणं चिन्तयन्तः किमपि किमपि प्रकल्प्य वदन्तः सन्ति । वस्तुस्थितिं ज्ञातुम् एतैः प्रयासः एव न कृतः । विषयस्य गूढतां वर्धयन्तः एते आत्मानम् एव वञ्चयन्तः सन्ति' इति अचिन्तयत् सः ।

चतुर्थे दिने तेन मनोहरस्य गृहे स्थितम् । तस्यां रात्रौ तु सः नूपुरध्वनिः अतिनिकटात् एव श्रुतः तेन । यावत् जयन्तः उत्थाय अपश्यत् तावता मनोहरः उत्थाय पार्श्वस्थं प्रकोष्ठम् अगच्छत् । अनन्तरं नूपुरस्य झणत्कारः स्थगितः । मनोहरः प्रत्यागत्य विना शब्दं मञ्चे शयनम् अकरोत् ।

अनन्तरदिने प्रातः जयन्तः मनोहरं नूपुर-ध्वनिविषये यदा अपृच्छत् तदा मनोहरः अवदत् - ''सद्यः एव मम विवाहः जातः इति भवान् जानाति एव । मम पत्नी निद्रासञ्चाररोगेण युक्ता अस्ति । आरात्रि जागरणं प्राप्य तस्याः रक्षणं कर्तुं न शक्यं खलु ? अतः अहं तस्याः पादयोः नूपुरं बद्धवान् अस्मि । यदा सा निद्रामग्ना एव उत्तिष्ठति तदा नूपुरशब्दः उत्पद्यते । तदा मया जागरणं प्राप्यते । तां पुनः आनीय शय्यायां शाययामि अहम् । एवं सकृत् शायितं चेत् आरात्रि सुखनिद्रां प्राप्नोति सा'' इति ।

''स च नूपुरस्य झणत्कारः दिवाकाले किमर्थं न श्रूयते ?'' इति कुतूहलेन अपृच्छत् जयन्तः ।

''वस्तुतः सा नूपुरधारणं सर्वथा न इच्छति । अतः सा यदा निद्रामग्ना भवति तदा अहं नूपुरं धारयामि, तस्याः जागरणात् पूर्वम् अपनयामि च । कानिचन दिनानि गच्छतु नाम । अनन्तरकाले सा नूपुरधारणं यथा अङ्गीकुर्यात् तथा कारयिष्यामि'' इति अवदत् मनोहरः ।

नूपुरझणत्कारस्य मर्म ज्ञातम् अभवत् जयन्तेन । अनन्तरदिने सः मित्राणि दृष्ट्वा अवदत् - ''भवद्भिः यः नूपुरझणत्कारः श्रुतः सः न पिशाच्याः, न महालक्ष्म्याः, न वा निधिदेव्याः, अपि तु मनोहरस्य पत्न्याः । मूढविचारे मतिं कुर्वन्तः भवन्तः व्यर्थतया धनव्ययं कृतवन्तः । इतः परं वा एतादृशी प्रवृत्तिः त्यज्यताम् । विचारनिकषेण परीक्ष्य एव विषयः ग्रहीतव्यः, न तु अविचिन्त्य । तदा एव जीवनं सुखपूर्णं तृप्तिदायकं च भवेत्'' इति ।

एतत् श्रुत्वा महेन्द्रादयः लज्जया शिरः अवनमय्य स्थितवन्तः । किञ्चित्कालानन्तरं ते परस्परं मुखं पश्यन्तः मुक्तमनस्कतया उच्चैः हसितवन्तः ।



वार्ताविशेषः

गगनयात्रिणां कृते चलच्चित्रम् !

अद्य विमानयानेषु बहुषु प्रत्यासनं दूरदर्शन-सम्बद्धा जवनिका भवति । प्रयाणकर्तारः व्यवस्थापकैः दत्तायाम् आवल्यां स्थितं यत्किमपि चित्रं द्रष्टुम् अर्हन्ति तत्र । एवमेव गगनयात्रिणः अपि चलचित्राणि द्रष्टुम् अर्हन्ति अद्य । अन्ताराष्ट्रियबाह्याकाशकेन्द्रे (ऐ.एस्.एस्.) स्थिताः गगनयात्रिणः हेरी-पाटर्चित्राणां दर्शने उत्सुकाः । अतः 'नासा' संस्थया *'हेरी पाटर् एण्ड् गोब्लेट् आफ् फायर्'* इत्येतस्य चित्रस्य प्रदर्शनाय व्यवस्था कृता अस्ति । ऐ.एस्.एस्.केन्द्रं भूमितः ३५४ कि.मी.मिते औन्नत्ये भ्रमत् भवति । आधुनिके वैज्ञानिके युगे किं किं न सम्भवेत् ?

भारतीयमहिला गगनयात्रायै चिता

वनजाशिवसुब्रमणियम्वर्या ३५ वर्षीया भारतीयमूला महिला । सा मलेशियादेशे तन्त्रज्ञा अस्ति । अग्रिमे वर्षे अन्ताराष्ट्रिय-बाह्याकाशकेन्द्रे (ऐ.एस्.एस्.) यः वासः कल्पयिष्यते तदर्थं चितेषु चतुर्षु अभ्यर्थिषु अन्यतमा अस्ति सा अपि । अन्यैः त्रिभिः सह सा अपि मास्कोनगरं गता अस्ति, रशियन्गगनयात्रिसंस्थया आयोजितां वैद्यकीयतान्त्रिकार्हतापरीक्षां सम्मुखीकर्तुम् ।

न्यूट्रिन्स्पर्धा - ३

१. वज्रखन्या युतं राज्यं किम् ?

अ) महाराष्ट्रम् आ) मध्यप्रदेशः

इ) राजस्थानम् ई) कर्णाटकम्

२. का नदी अरेबियन्समुद्राभिमुखं प्रवहति ?

अ) नर्मदा आ) गोदावरी

इ) कृष्णा ई) कावेरी

(उत्तराणि ६३ तमे पुष्ठे)

India's largest selling sweets and toffees.



गोलाकारिकायाः शिलायाः कथा

विद्यानन्दस्वामी विजयपुरम् आगतवान् । तस्य ग्रामस्य प्रमुखः विश्वपतिः स्वगृहे तस्य वासं परिकल्प्य तं योग्येन आतिथ्येन सत्कृतवान् । तस्य प्रवचनार्थं सभामण्डपादिकं निर्मातुं प्रभूतं धनम् अपि सः दत्तवान् । अतः प्रवचनमण्डपे विद्यानन्दस्वामिनां पीठस्य पार्श्वे एव एकं भव्यम् उत्कृष्टम् आसनं परिकल्पितं व्यवस्थापकैः ।

प्रवचनारम्भात् किञ्चित् पूर्वं तत् स्थलम् आगतवान् विश्वपतिः । यद्यपि सः आसनम् अपश्यत्, तथापि तस्मिन् अनुपविशन् सामान्यैः सह भूमौ एव उपाविशत् । एतत् लक्षितवद्भिः व्यवस्थापकैः बहुधा निवेदितं चेदपि आसने उपवेशनं सर्वथा न अनुमतं तेन ।

विद्यानन्दस्वामिवर्येण अपि एषः प्रसङ्गः अवलोकितः एव । तस्मै विश्वपतेः एषः व्यवहारः विशेषतः अरोचत । अतः एव प्रवचनसमये सः - ''मानवेषु ये गुणाः अवश्यं भवेयुः तेषु विनयः प्रधानः । यत्र विनयः भवति तत्र सहनाशक्तिदैवभक्त्यादयः अवश्यं भवन्ति । सम्पद्धवनपत्नीपुत्रादयः पूर्वजन्मनः पुण्यस्य परिणामतः प्राप्यन्ते इति प्राज्ञाः वदन्ति । यत् प्राप्तं तस्य परिरक्षणाय प्रयासः अवश्यं करणीयः । इहलोकसुखं न शाश्वतम् । अतः लोके सर्वैः अपि परलोकसुखार्थम् एव अधिकः प्रयासः करणीयः । सद्व्यवहाराः एव इहलोके परलोके च उपकुर्वन्ति । विनयः तेषु प्रमुखः । अस्माकं स्थितिः उच्चा नीचा वा स्यात् नाम, तथापि विनयः तु कदापि न परित्यक्तव्यः । यत्र बिनयः तत्र गर्वादीनाम् अवकाशः न भवति । अत्र उदाहरणरूपेण अहं गोलाकारिकायाः कस्याश्चित् शिलायाः कथाम् अत्र श्रावयामि'' इति उक्त्वा कथाम् आरब्धवान् -

गोदावरीनद्याः तटे आम्रनारिकेलादयः

चक्रपाणिः

विविधाः वृक्षाः आसन् । कदाचित् गोदावर्यां महापूरः उत्पन्नः । महावेगकारणतः पर्वतस्था काचित् शिला प्रवाहेण सह आगता । नदीतटे स्थितानां नारिकेलवृक्षाणां मध्ये अवरुद्धा सती अतिष्ठत् सा । नारिकेलवृक्षाणां मूलैः बद्धा सा अग्रे न अगच्छत् ।

अल्पे एव काले प्रवाहवेगः क्षीणः जातः । सूर्यकिरणानां कारणतः सा शिला शोभमाना जाता ।

तां लक्षितवान् कश्चन उन्नतः नारिकेलवृक्षः अपृच्छत् – ''अये ! भवती कुतः अत्र आगता ? कथम् अत्र स्थिता ? अग्रे कुतः न गतम् ?'' इति ।

शिला तु किमपि उत्तरं न अवदत् । अत्रान्तरे वृक्षस्य उपरि स्थितम् एकं नारिकेल-फलं सोपहासम् अवदत् – ''एतस्याः कथाम् अहं जानामि । एतस्याः जन्म पर्वतस्य उपरि । प्रवाहवेगकारणतः शिलाः भग्नाः भवन्ति, प्रवाहेण नीयन्ते च । तथा आगता अस्ति एषा शिला । प्रवाहस्य आधातान् प्राप्य एषा गोलाकारिका जाता अस्ति । यदि अस्माकं मध्ये एषा पतिता न स्यात् तर्हि पुनरपि छेदं प्राप्य सिकताकणत्वं गता सती समुद्रे विलीना अभविष्यत्'' इति ।

''यथा प्रहारः तथा आकारः । किम् एतत् अपि किञ्चन जीवनम् ? धिक् एतत् जीवनम् !! वयं तु साभिमानं शिरः उन्नमय्य आकाशे तिष्ठामः । आनन्देन गर्वेण च जीवामः वयम्'' इति अवदत् अपरं नारिकेल-फलम् ।

गोलशिलया किमपि प्रत्युत्तरं न उक्तम् । एवमेव कालः गतः ।

नदीतीरसमीपे कश्चन शिवालयः आसीत् । कश्चन भक्तः स्थालिकायां नारिकेलपुष्प-गन्धवर्तिकादीनि संस्थाप्य तं शिवदेवालयम् अगच्छत् । नारिकेलं शिवलिङ्गस्य पुरतः अस्थापयत् ।

नारिकेलेन त्रीणि अपि नेत्राणि विशालीकृत्य शिवलिङ्गं दृष्टम् । तेन अभिज्ञातं यत् पूर्वं कदाचित् वृक्षाणां मध्ये दृष्टा गोलशिला एव एषा इति ।

तावता सा मूर्तिरूपा शिला अपृच्छत् - ''अये मित्र ! भवतः उच्चस्थितिः गर्वः च क्व गतः ? अपमानसहनस्यापि कापि सीमा स्यात् इति उक्तम् आसीत् खलु भवता ? आत्मानम् अमरं मत्वा पूर्वं मयि महती उपेक्षा दर्शिता आसीत् भवता । किन्तु अद्य किं जातम् ? किमर्थम् एषा क्षीणा दशा प्राप्ता भवता ?'' इति ।

तावता अर्चकः अन्यया शिलया घट्टयित्वा नारिकेलस्य भङ्गम् अकरोत् । तदा पश्चात्ताप-दग्धेन नारिकेलेन उक्तम् - ''आर्ये ! क्षन्तव्यः अहम् । वृक्षस्य ऊर्ध्वभागे स्थितः अहं गर्वेण व्यवहरामि स्म । अधः स्थितान् धिक्करोमि स्म । अद्य तु भवत्याः सर्वपूज्यता । मम च नैवेद्यरूपता । भवत्या उन्नते पर्वते जन्म प्राप्तम् । पवित्रायां गोदावर्यां वासः कृतः । कष्टानि बहुधा सोढानि । अतः एव अद्य एषा पूजार्हता प्राप्ता अस्ति भवत्या । सहना विनयश्च भवत्याः गुणः आसीत्'' इति ।

अर्चकेण पश्चात्तापदग्धं तत् नारिकेलं शिवाय अर्पितम् । तस्मात् तत् पवित्रं जातम् । प्रसादरूपेण तस्य वितरणं प्रवृत्तम् ।''

एवं कथां समाप्य विद्यानन्दस्वामिवर्यः पुनः अवदत् - ''नदीप्रवाहे यथा गोलशिलया विविधानि कष्टानि सोढानि तथा मानवेन अपि जीवने अनेकानि कष्टानि सोढव्यानि भवन्ति । यः सर्वं सोढ्वा अग्रे गच्छति सः एव उन्नतां स्थितिम् अवाप्नोति । तस्यैव जीवनं धन्यं भवति । सः एव पूज्यः भवति लोके । यः तु महता गर्वेण व्यवहरति सः नारिकेलम् इव अन्याधीनताम् अनुभवति निश्चयेन । जीवने तेन कदाचित् वा महान् पश्चात्तापः अनु-भोक्तव्यः भवति एव'' इति ।



यः कर्तव्यं निर्वहति सः एव पुत्रः

श्रीपुरवासी विश्वनाथः वृत्त्या अध्यापकः । स्ववृत्तौ तस्य विशेषप्रीतिः । तस्य अध्यापनम् उत्तमम् । अतः विद्यार्थिनः तेषां पितरः च तस्मिन् विशेषतः स्निह्यन्ति स्म ।

विश्वनाथस्य पत्नी लक्ष्मीः गुणवती पत्यनुरूपा च । तयोः पुत्रस्य नाम चैतन्यः इति । विश्वनाथः लक्ष्मीः च पुत्रं प्रीत्या पोषितवन्तौ । ग्रामे अध्ययनं समाप्य चैतन्यः अग्रिमाध्ययनाय नगरं गतवान् ।उच्चाध्ययनं कृत्वा तत्रैव उद्योगं प्राप्य सः काञ्चित् तरुणीं परिणीतवान् । एतदर्थं मातापित्रोः अङ्गीकारः न प्राप्तः तेन ।

पुत्रस्य एतेन व्यवहारेण खिन्नः विश्वनाथः कदाचित् पत्नीम् अवदत् - ''अस्मान् अपृष्ट्वा एव तेन काचित् परिणीता । यदि सः अस्मान् पृच्छेत् तर्हि किं वयं निराकुर्याम ?'' इति ।

तस्मिन् एव वर्षे ग्रीष्मविरामकाले सः पत्न्या सह तीर्थयात्रार्थं गतवान् । हरिद्वारे तेन कानिचन दिनानि उषितम् । कदाचित् सः भगवतः दर्शनं प्राप्य मन्दिरस्य पुरतः उपविष्टवान् आसीत् । तदा दशवर्षीयः कश्चन बालकः भिक्षां याचन् तस्य पुरतः आगतवान् ।

''वत्स ! एषः अध्ययनार्थं समयः । किमर्थं भिक्षायाचनं क्रियते भवता ? भवतः मातापितरौ किं कुरुतः ?'' इति अपृच्छत् विश्वनाथः ।

''षड्भ्यः वर्षेभ्यः पूर्वं मम मातापितरौ नौकादुर्घटनायां प्राणवियोगं प्राप्तवन्तौ । वयं निर्धनाः । मम पितामहः अङ्गविकलः । भिक्षातः यत् प्राप्यते तेनैव आवाभ्याम् उदरं पूर्यते'' इति दैन्येन अवदत् सः बालः ।

विश्वनाथः तम् अपृच्छत् - ''भवतः नाम किम् ?'' इति ।

''मल्लिकः'' इति उक्तं बालेन ।

''भवतः अध्ययनाय यदि अहं व्यवस्थां कुर्यां तर्हि किं भवान् अध्ययनं कुर्यात् ?'' इति पृष्टवान् विश्वनाथः ।

''अवश्यम् । किन्तु तदा मम पितामहस्य का गतिः भवेत् ?'' इति सातङ्कम् अपृच्छत् मल्लिकः ।

''तस्य निमित्तम् अपि योग्यां व्यवस्थाम् अहं करिष्यामि ।

अध्ययनं किं क्रियेत भवता ?'' इति पुनः अपृच्छत् विश्वनाथः । अङ्गीकारपूर्वकं शिरः चालितवान् मल्लिकः ।

एतदनन्तरं विश्वनाथः पत्न्याः अङ्गीकारं प्राप्य मल्लिकं स्वगृहं नीत्वा अध्ययनाय व्यवस्थां कृतवान् । तस्य पितामहः अपि तेन स्वगृहं नीतः ।

कालः गतः । दशवर्षाभ्यन्तरे मल्लिकः उत्तमं शिक्षणं प्राप्तवान् । वृद्धः पितामहः दिवं गतः । विश्वनाथः अपि दिवं गतः । विश्वनाथस्य मरणात् लक्ष्मीः यथा तथैव ग्रामवासिनः सर्वे दुःखं प्राप्तवन्तः । पितुः उत्तरक्रियार्थं पुत्रः चैतन्यः आगन्तुं न शक्तः, यतः कार्यार्थं सः दूरप्रदेशं गतः आसीत् । मल्लिकेन एव विश्वनाथस्य उत्तरक्रिया निर्वर्तिता ।



सप्ताहद्वयानन्तरं चैतन्यः श्रीपुरम् आगतवान् । 'समग्रा सम्पत्तिः मल्लिकाय दातव्या' इति पित्रा मृत्युपत्रं लिखितम् इति ज्ञातवतः चैतन्यस्य महान् कोपः । मात्रा सह मया एतद्विषये कलहः करणीयः इति विचिन्त्य सः वेगेन मातुः प्रकोष्ठं प्रति अगच्छत् । तावता प्रकोष्ठे प्रवर्तमानं सम्भाषणं तेन श्रुतम् । सः गमनं स्थगितवान् ।

मल्लिकः वदति स्म - ''गुरुवर्येण मम शिक्षणस्य व्यवस्था कृता । पदवीबलेन अहं कुत्रचित् उद्योगं प्राप्नुयाम् एव । एतावत्पर्यन्तं भवन्तौ मां पोषितवन्तौ । मह्यम् आश्रयं, शिक्षणं, प्रीतिं च दत्तवन्तौ । अतः आजीवनं भवत्याः निमित्तं व्यवस्थाकल्पनं मम आद्यं कर्तव्यम् । तदहं करिष्यामि एव । किन्तु एषा सम्पत्तिः मह्यं मास्तु । भवत्याः पुत्राय अहम् एताम् अर्पयितुम् इच्छामि । कृपया अनुज्ञायताम्'' इति ।

एतस्य वचनस्य श्रवणात् चैतन्यः मल्लिकस्य हृदयस्य वैशाल्यम् अवगतवान् । सः अन्तः गत्वा मल्लिकस्य हस्तौ गृहीत्वा - ''भवान् मम भ्रातृसमानः । जन्मना कोऽपि पुत्रत्वं न प्राप्नोति । यः मातापित्रोः विषये स्वकर्तव्यं निर्वहति सः एव वस्तुतः पुत्रः । अतः पैतृकी सम्पत्तिः भवता एव प्राप्ता भवेत् । मम माता नगरं प्रति आगन्तुं न इच्छति । अतः अत्र स्थित्वा भवता एव तस्याः योगक्षेमादिकं द्रष्टव्यम्'' इति अवदत् ।

तस्य प्रार्थनाम् अङ्गीकुर्वन् मल्लिकः ग्रामे एव अवसत् । यत्र अधीतं तस्मिन् विद्यालये एव तेन अध्यापकोद्योगः अपि प्राप्तः । लक्ष्मीं सः मातरं भावयन् प्रीत्या पोषितवान् । लक्ष्मीः यावज्जीवं सन्तोषेण दिनानि यापितवती ।

- वि. प्रवीणा, नेल्लूरुजिल्ला

चन्दमामाप्रश्नावली - ११

Co-sponsored by
Infosys FOUNDATION,
Bangalore

यः समुचितम् उत्तरं दास्यति सः अर्हति रू.२५०/- पारितोषिकत्वेन*

अत्र ये प्रश्नाः भवन्ति तेषाम् उत्तराणि गत-वर्षस्य (२००५) द्वादशसु सञ्चिकासु शीर्षकेषु कथासु वा सन्ति । यत् पठितं तस्य स्मरणतः उत्तरम् अविलम्बेन प्राप्यते । यदि न स्मर्येत तर्हि गतस्य वर्षस्य द्वादश अङ्कान् पुरतः संस्थाप्य पृष्ठेषु परिशील्य उत्तरं प्राप्यतां लीलया । आम्, लीलाविषयः एव अस्ति अयम् ।

** एकाधिककजनाः यदि समुचितम् उत्तर प्रेषयेयुः तर्हि तेषु पञ्च जनान् याहच्छिकतया चित्वा तेषु पारितोषिकधनं वितीर्यते ।*

एवं क्रियतां भवद्भिः - १. उत्तराणि लेखनीयानि । २. नाम, वयः, (ऊनषोडशवर्षीयाः एव अत्र भागं वोढुम् अर्हाः) सङ्केतः (पिन्कोड्सहितः) च प्रेषणीयम् । ३. एकस्य कुटुम्बस्य एकः एव सदस्यः अत्र भागं वोढुम् अर्हः । ४. ग्राहकता अस्ति चेत् ग्राहकसङ्ख्या लिख्यताम् । ५. पिहितपत्रस्य उपरि चन्द-मामाप्रश्नावली - ११ इति लेखनीयम् । ६. डिसेम्बर्समाप्तितः पूर्वम् उत्तराणि अस्माभिः प्राप्तव्यानि । ७. फेब्रवरीमासे परिणामः प्रकाशयिष्यते ।

१. 'पूर्वं यत् दण्डितं तस्य विषये विवेकिनः खिन्नाः न भवन्ति, अपि तु कृतज्ञताभावं वहन्ति' इत्येतत् शिल्पाचार्यवचनं श्रुत्वा राजा स्वव्यवहारं परिष्कृतवान् । सः राजा कः ? अयम् अंशः कस्यां कथायाम् अस्ति ?

२. अन्ताराष्ट्रियं दारिद्र्यनिवारणदिनं कदा आचर्यते ?

३. सिद्धार्थः यदा कठोरे तपसि मग्नः आसीत् तदा काचित् गर्भिणी गोपिका - ''मयि पुत्रः यदि जायेत तर्हि एतस्य तपस्विनः पुनः दर्शनं करिष्यामि'' इति सङ्कल्पं कृतवती । तस्याः नाम किम् ?

४. 'उत्तमानुत्तमतानिर्णयः तत्तस्य चिन्तनम् अवलम्बते, न तु कर्म' इत्येतत् धर्मसूत्रं कस्यां वेतालकथायां निरूपितम् अस्ति ?

५. 'पूर्वजैः अनुसृतम् इति एकेन एव कारणेन विना चिन्तनं नियमानाम् अनुसरणम् अनर्थाय' इत्येषा नीतिः कस्यां कथायां ज्ञापिता अस्ति ?

६. एतत् चित्रं कस्याः कथायाः ?

गुजरातराज्यीया जानपदकथा

नापितस्य भाग्यप्राप्तिः

सेवारामः कश्चन निर्धनः नापितः । गृहनिर्वहणार्थं यावत् आवश्यकं तावत् अपि धनं सः अर्जयितुम् अशक्तः आसीत् । अतः महती निर्धनता तं बाधते स्म सदापि । तत्तद्दिनस्य आयः तत्तद्दिनस्य तण्डुलशाकादिक्रयणाय अपि अपर्याप्तः भवति स्म । यस्मिन् दिने अधिकम् अर्जनं भवेत् तस्मिन् दिने आतृप्ति भोजनं भवेत् । किन्तु तादृशं दिनं तस्य जीवने विरलम् एव । अतः तस्य पत्नी शिवानी सदा तं निन्दति स्म – 'भवान् अयोग्यः, मूर्खः च' इति । सा सदा विवाहस्य पूर्वतनं जीवनं स्मरति स्म, यच्च विविधैः भक्ष्यैः, वर्णरञ्जितैः वस्त्रैः च सम्पन्नम् आसीत् ।

एकदा सायङ्काले सेवारामः रिक्तहस्तः सन् गृहम् आगतवान् । तस्मात् तेन रात्रौ शयनपर्यन्तं पत्न्याः तर्जननिन्दनपीडा निरन्तरम् अनुभोक्तव्या अभवत् । एतस्य निवारणार्थं मया किं करणीयम् इति चिन्तयन् एव सः निद्रां प्राप्तवान् ।

प्रातः शीघ्रम् एव उत्थाय स्नानादिकं समाप्य कर्तरीकङ्कतादीनि क्षौरोपकरणानि गृहीत्वा गृहतः प्रस्थितवान् सः पत्नीम् आहूय उक्तवान् – "यावत् मया पर्याप्तमात्रेण धनं न अर्ज्येत तावत् गृहं प्रति न आगमिष्यते" इति ।

द्वारे स्थित्वा एतत् श्रुतवती शिवानी आश्चर्ययुक्ता अभवत् । सा तं किमपि न अवदत् ।

तया तु एतत् ज्ञातमेव आसीत् यत् तस्मिन् ग्रामे तादृशाः धनिकाः न सन्ति, ये च प्रतिदिनं मुखक्षौरं कदाचित् केशकर्तनं वा कारयित्वा तदुचितं धनं दद्युः । ग्रामजनाः सर्वे निर्धनाः एव । ते नापिताय किं वा दद्युः ? तेषु बहवः जनाः 'अग्रिमचक्रे दास्यामः' इति आश्वासनमात्रं यच्छन्ति स्म । अतः सेवारामस्य स्थितौ प्रगतिः न भवति स्म एव ।

सेवारामः ग्रामं त्यक्त्वा बहुदूरं गतवान् ।

तस्मात् तेन महती श्रान्तता प्राप्ता । श्रान्ततायाः निवारणाय सः कस्यचित् महतः वृक्षस्य छायायाम् उपविष्टवान् । 'नगरगन्तारः कदाचित् मम उपकरणानि दृष्ट्वा त्वरया क्षौरं कारयेयुः अपि' इति तस्य चिन्तनम् आसीत् । दौर्भाग्य-वशात् कोऽपि तादृशः न प्राप्तः तेन । श्रान्तः सः विश्रान्त्यर्थं कञ्चित् समयं तत्रैव पादौ हस्तौ च प्रसारितवान् । शयनस्य अनुक्षणं तेन निद्रा प्राप्ता ।

यस्य वृक्षस्य अधः सः निद्रां कृतवान् आसीत् तस्मिन् एव वृक्षे पिशाचः कश्चन वासं करोति स्म । सेवारामस्य घोरिकाध्वनिं श्रुत्वा '[illegible] यस्य अन्वेषणाय मया प्रयतनीयम् आसीत् [illegible] स्वयम् एव मत्समीपम् [illegible] सः उपरिष्टात् अधः अवतीर्णवान् ।

वृक्षात् अवतीर्णः पिशाचः – 'आदौ एतं जागरय्य भाययिष्यामि, ततः खादिष्यामि' इति चिन्तितवान् । बहुधा ध्वनिः कृतः चेदपि गभीर-निद्रां प्राप्तवान् सेवारामः जागरणं न प्राप्तवान् एव । यदा पिशाचः तं हस्ताभ्यां बलात् अकम्पयत् तदा सेवारामः मन्दं नेत्रे उन्मीलित-वान् । पिशाचः तस्य मुखस्य समीपे स्वस्य भयङ्करं वदनं स्थापयित्वा तं भीतं कर्तुं चेष्टां कुर्वन् – "भोः, अद्य भवतः देहः मम कवलायते इति चिन्तयतः मम महान् अस्ति सन्तोषः" इति अवदत् । हस्तद्वयेन सः तस्य कण्ठं दृढतया गृहीतवान् अपि ।

बहुदूरं पादाभ्यां चलितम् इति कारणेन नितरां श्रान्तः सेवारामः क्षणं यावत् पुरतः प्रवर्तमानं

सम्यक् न अवगतवान् । किन्तु यदा पुरतः पिशाचः दृष्टः तदा तु सः दिग्भ्रान्तः जातः । 'अद्य पिशाचहस्तेन एव मरणं भविष्यति इति भाति' इति चिन्तयन् सः तदर्थं सज्जः अभवत् अपि । अनुक्षणं तेन असहाया पत्नी स्मृता । 'मम मरणानन्तरं वराकी सा कथं जीवेत् ?' इति चिन्तनम् आगतं तस्य मनसि । तस्याः कृते वा मया कथमपि मरणात् आत्मा रक्षणीयः इति चिन्तयतः तस्य मनसि उपायः कश्चित् झटिति एव स्फुरितः ।

''अये, मूर्खपिशाच ! अलं मौढ्येन । अचिरात् मम दृष्टिपथात् यदि भवता न अपगम्येत तर्हि महत् कष्टम् अनुभोक्तव्यं भवेत्'' इति पिशाचम् अवदत् सः । किन्तु पिशाचः ततः न अपगतः ।

''किं भवान् मया गृहीतं पिशाचं द्रष्टुम् इच्छति ?'' इति पृच्छन् सेवारामः स्वस्य क्षौरपेटिकाम् उद्घाट्य तत्रत्यं दर्पणं बहिः आनीय - ''अत्र पश्यतु तावत् । एतादृशाः अन्ये अपि पिशाचाः सन्ति मम पेटिकायाम्'' इति अवदत् ।

दर्पणे स्थितं पिशाचरूपं दृष्ट्वा सः पिशाचः दिग्भ्रान्तः, भीतः च । ''अहो ! हा हन्त ! भोः, कृपया मां तेन सह पेटिकायां मा बध्नातु'' इति अवदत् पिशाचः सेवारामस्य हस्तौ गृहीत्वा ।

''अस्तु नाम । सूर्योदयात् पूर्वं भवान् रत्नादीनाम् आनयनं दानं च यदि अङ्गीकुर्यात् तर्हि अहं पेटिकायां भवतः बन्धनस्य चिन्तनं परित्यजेयम्'' इति अवदत् सेवारामः ।

पिशाचः एतत् अङ्गीकृत्य ततः अदृश्यः जातः । सेवारामः दर्पणं पेटिकायां संस्थाप्य सूर्योदयम् एव प्रतीक्षमाणः उपाविशत् ।

सूर्योदयात् पूर्वम् एव पिशाचः तस्य पुरतः प्रत्यक्षः भूत्वा रत्नग्रन्थिम् अस्थापयत् । ग्रन्थिम् उद्घाट्य रत्नानि अभिज्ञाय तृप्तिं प्रकटितवान् सेवारामः ।

''भवतु नाम । एषोऽहम् इदानीं नगरं गमिष्यामि । सायं पुनः आगमिष्यामि'' इति उक्त्वा सः नगरं प्रति प्रस्थितवान् । 'ग्रामं प्रति रत्नादीनां नयनेन न किमपि प्रयोजनम् । अतः नगरे एतस्य विक्रयणं वरम्' इति चिन्तितवान् आसीत् सः ।

नगरं यावत् प्राप्तं तावता तस्य मनसि अपरः विचारः आगतः - 'एतेषां विक्रयणात् अपि न्यासीकृत्य धनप्राप्तिः एव वरम्' इति । अतः सः नगरे कुसीदवणिजः आपणम् अन्विष्य आपणिकम् अवदत् - ''एतानि न्यासीकृत्य किञ्चित् धनं दीयताम् । मासानन्तरं मया एतानि

प्रतिनेष्यन्ते'' इति ।

कुसीदवणिक् तानि परीक्ष्य तेषाम् अकृत्रिमतां दृढीकृत्य सेवारामाय प्रभूतम् एव धनं दत्तवान् ।

सेवारामं महती बुभुक्षा बाधते स्म । अतः सः आपणिकं पृष्ट्वा भोजनालयस्थानं ज्ञात्वा तत्र गत्वा आतृप्ति भोजनम् अकरोत् । ततः कस्यचित् गृहस्य पुरतः सुखेन शयानः सः विश्रान्तिसुखम् अपि सम्यक् अनुभूतवान् । सायङ्कालाभ्यन्तरे तस्य सर्वा अपि श्रान्तिः अपगता आसीत् ।

ततः निर्गतः सः अन्धकारप्राप्तितः पूर्वं तत् स्थलं प्राप्तवान्, यत्र च रत्नानि प्राप्तानि आसन् ।

यदा सर्वत्र अन्धकारः प्रसृतः तदा सेवारामः पेटिकायाः उपरि हस्तं संस्थाप्य शयनम् अकरोत् । पिशाचागमनसम्भावना आसीत् इत्यतः तेन निद्रा तु न कृता ।

वृक्षस्य उपरि स्थितः पिशाचः तं दृष्ट्वा अपरस्मिन् वृक्षे निवसन्तं पिशाचम् आहूय गतरात्रौ प्रवृत्तं सर्वं विस्तरेण अश्रावयत् । ततः तौ बहुधा चिन्तनं कृतवन्तौ । अन्ते निर्णीतं यत् पूर्वदिने दत्तानि रत्नानि प्रतिप्राप्तव्यानि, यत् पिशाचान् आत्मनि धरति तत् वस्तु चोरणीयं च इति । मध्यरात्रसमये तौ अधः आगतौ । सेवारामः निद्रां कृतवान् उत न, तदीयायाः पेटिकायाः अपहरणं कथं शक्येत इति तौ परिशीलितवन्तौ ।

सेवारामः तु निद्राम् अभिनयन् निमीलितनेत्रः सन् जागरितः एव आसीत् । यदा तौ पेटिकां स्पृष्टवन्तौ तदा सः झटिति उत्थाय पेटिकातः दर्पणं कर्तरीं च बहिः आनीतवान् । एकेन हस्तेन दर्पणः, अपरेण कर्तरी च तेन गृहीतः । कर्तरीं पिशाचयोः अभिमुखं गृहीत्वा सः 'कर् कर्' इति कर्तनशब्दम् उच्चैः अकरोत् । दर्पणः च पिशाचयोः पुरतः गृहीतः आसीत् तेन । कर्तरीशब्दं कर्तरीचालनं च दृष्ट्वा पिशाचौ नितरां भीतौ ।

यावत् तौ वृक्षम् आरोढुम् उद्युक्तौ तावता सेवारामः दृढस्वरेण अवदत् - ''अलम् अलं पलायनेन । भवतोः अन्यतरः इतः गत्वा सुवर्णनाणकानि आनयेत्, सूर्योदयात् पूर्वं प्रत्यागच्छेत् च । अन्यथा भवन्तौ उभौ अपि पेटिकायां स्थापयिष्यामि अन्यैः क्रूरजन्तुभिः सह'' इति ।

एतत् श्रुत्वा अपरः पिशाचः ततः अधावत् । सेवारामः मनसि एव हसन् कर्तरीदर्पणहस्तः

सन् तत्रैव उपाविशत् । 'यावत् मम सुहृत् न प्रत्यागच्छेत् तावत् इतः मम मोक्षः नास्ति' इति चिन्तयन् अपरः पिशाचः अपि भीत्या कम्पमानः तत्रैव अतिष्ठत् ।

सूर्योदयात् पूर्वम् एव आगतः पिशाचः सुवर्णनाणकग्रन्थिं कञ्चित् सेवारामस्य पुरतः अस्थापयत् । सेवारामः निरुद्विग्नतया सुवर्ण-नाणकग्रन्थिं प्राप्य कर्तरीदर्पणहस्तः सन् एव अवदत् - ''इदानीं सूर्योदयः आसन्नः अस्ति । अतः इतः निर्गच्छन् अस्मि अहम् । सायम् अहं प्रत्यागमिष्यामि । तदवसरे अपि भवतोः व्यवहारः असमीचीनः यदि स्यात् तर्हि अवश्यम् एव भवतोः बन्धनं भवेत्'' इति ।

ततः सः स्वस्य दर्पणं कर्तरीं च पेटिकायां स्थापितवान् । 'हन्त ! आवां रक्षितौ !' इति चिन्तयन्तौ तौ पिशाचौ झटिति एव अदृश्यतां गतवन्तौ । सेवारामः नगरं प्रति गमनस्य चिन्तनम् अकृत्वा ग्रामं प्रति प्रस्थितवान् ।

दिनद्वयाभ्यन्तरे एव प्रत्यागतं पतिं दृष्ट्वा शिवानी नितराम् आश्चर्ययुक्ता जाता । सेवारामः गते दिनद्वये प्रवृत्तं सर्वं तां निवेदितवान् । सर्वं श्रुत्वा शिवानी आश्चर्येण स्तब्धा अभवत् । अप्रयत्नेन तस्याः मुखात् वचनं निर्गतम् - ''अहो, धैर्यं भवतः ! भवान् महाबुद्धिमान् उपायचतुरः च इत्यत्र नास्ति सन्देहः'' इति ।

''अद्य वा भवत्याः मुखात् मम विषये उत्तमः अभिप्रायः निर्गतः खलु ? धन्योऽहम्'' इति मन्दहासपूर्वकम् अवदत् सेवारामः ।

निर्धनत्वस्य अपगमात् अनन्तरकाले सः सुखेन जीवितवान् ।

महापुरुषाणां जीवनघटना - १२

श्रेष्ठस्य राजकुमारस्य विषादमयानि अन्तिमदिनानि



चक्रवर्तिनः शाहजहानस्य चत्वारः पुत्राः । तेषु ज्येष्ठस्य नाम दाराशुकोहः इति । एषः अन्येभ्यः राजकुमारेभ्यः सर्वथा भिन्नः । सत्यान्वेषकेण तेन वेदाः उपनिषदः च अधीताः आसन् । काश्चन उपनिषदः अरबिक्-भाषया अनूदिताः आसन् अपि । सः सर्वदा प्रसिद्धैः विद्वद्भिः सह उपविश्य तत्त्व-शास्त्रविषये चर्चां करोति स्म । सः बुद्धिमान् शूरः च सन् अपि सैन्यबले विश्वासवान् न आसीत् । स्नेहपूर्णेन सौजन्ययुक्तेन च व्यवहारेण सः सर्वेषां हृदयं जितवान् आसीत् । असहायेभ्यः धनं द्रव्याणि च दत्त्वा उपकरोति स्म सः ।

यथा यथा दिनानि गतानि तथा तथा वैदिकसाहित्ये तस्य आसक्तिः प्रवृद्धा । सहजतया सः तादृशस्य साहित्यस्य अध्ययनाय एव अधिकं समयं यापयति स्म । तस्य एषा प्रवृत्तिः केभ्यश्चित् सम्प्रदायप्रियेभ्यः पण्डितेभ्यः न अरोचत । तथापि ते किमपि कर्तुं न अर्हन्ति स्म । प्रपितामहे अकबरे या बुद्धिमत्ता, यत् कौशलं च दृश्यते स्म सा एव बुद्धिमत्ता, तदेव कौशलं च दृश्यते स्म दाराशुकोहे अपि ।

ये दाराशुकोहे असूयावन्तः आसन् ते शाह-जहानस्य अन्येषु पुत्रेषु दुर्भावं जनयितुं प्रयासम् अकुर्वन् । एवं दाराशुकोहविषये विरोधभावं प्राप्तवत्सु अन्यतमः आसीत् तृतीयः पुत्रः औरङ्ग-जेबः । महत्त्वाकाङ्क्षी सः स्वलाभसाधनाय यत्किमपि कर्तुं सज्जः आसीत् । १६५७ तमे वर्षे शाहजहानः नितराम् अस्वस्थः जातः ।

दारशुकोहस्य सिंहासनारोहणं निश्चितप्रायम् आसीत् । तावता औरङ्गजेबः अनुजेन मुरादेन सह ससैन्यम् आगत्य राजधानीम् आक्रम्य सिंहासनस्य स्वायत्तीकरणाय प्रयासम् अकरोत् । पितुः साहाय्यं प्राप्य दाराशुकोहः त्रिषु स्थलेषु औरङ्गजेबं विरुध्य युद्धम् अकरोत् । तथापि अन्तिमजयः तु औरङ्गजेबस्य एव जातः । विजयं प्राप्तवान् औरङ्गजेबः पितरं कारागारे स्थापयित्वा स्वस्य चक्रवर्तित्वम् उद्घोषितवान् । तस्य द्वितीयः सहोदरः सुजः अपि सिंहासनाय प्रयासं कृत्वा पराजयं प्राप्य रणरङ्गात् पलायितः सन् अरकानप्रदेशे मरणं प्राप्नोत् । औरङ्गजेबः साहाय्यं कृतवते अनुजाय मुरादाय अर्धराज्यदानं यद्यपि प्रतिज्ञातवान् आसीत्, तथापि अन्ते मुरादेन प्राप्तम् उपायनं तु कारागारवासः एव ।

दाराशुकोहः स्थानात् स्थानं प्रति गच्छन् एतदभ्यन्तरे एव पत्नीवियोगं प्राप्तवान् । अन्ते सः अफगानराजस्य जीवनखानस्य आश्रयं प्राप्तवान् । पूर्वं कदाचित् राजा शाहजहानः आज्ञापितवान् आसीत् यत् गजस्य पादयोः अधः पातयित्वा जीवनखानः मारणीयः इति । तदा दाराशुकोहः एव तं रक्षितवान् आसीत् । किन्तु सः एव कृतघ्नताम् आचरन् दाराशुकोहम् औरङ्गजेबस्य अधीनं कृतवान् । औरङ्गजेबः दाराशुकोहम् आग्रानगरीये कारागारे स्थापितवान् ।

सिंहासनस्य उत्तराधिकारिणं तं गजस्य उपरि आरोप्य शोभायात्रा कारिता आसीत् पूर्वम् । सः एव इदानीम् बन्दित्वेन आकृष्य नीयमानः आसीत् सहस्रशः जनानां पुरतः । एवं नीयमानं तं दृष्ट्वा कश्चन याचकः उच्चैः अवदत् - ''राजकुमार ! पूर्वं बहुवारं भवता मह्यम् अमूल्यानि उपायनानि दत्तानि आसन् । किन्तु इदानीं दौर्भाग्यवशात् कस्यचित् अपि वस्तुनः दाने असमर्थः जातः अस्ति भवान्'' इति ।

दाराशुकोहः एतत् श्रुतवान् । झटिति एव आत्मना धृतं राङ्कवम् एव अपनीय तस्मै याचकाय दत्तवान् सः । एतत् दृश्यं दृष्टवन्तः जनाः अश्रूणि स्रावयन्तः एतां घटनां गीतरूपेण गीतवन्तः । सार्वजनिकरूपेण जातं तस्य दर्शनम् एतदेव अन्तिमं जातम् । औरङ्गजेबेन प्रेरिताः केचन मतगुरवः तस्य मरणदण्डनम् आदिष्टवन्तः ।

१६५९ तमे वर्षे अगस्टमासस्य ३० तमे दिनाङ्के सः प्राणवियोगं प्राप्तवान् ।

नवम्याः चन्दमामाप्रश्नावल्याः उत्तराणि

१. विष्णुपदस्य अर्थः - सर्वत्र सर्वदा व्याप्तः इति ।
२. हीरादेवी इति ।
३. पपेन्नामकः अंशः ।
४. चेन्नः ।
५. कोचीनगरे । जवहरलालनेहरू-अन्ताराष्ट्रियं क्रीडाङ्गणम् ।
६. डेरियसनामकः ।
७. 'गगनस्पर्शिनी नासिका' इत्येतस्याः जपानीयकथायाः ।

अमूल्यं स्मारकम्

शिववर्मा विदिशाराज्यस्य राजा । तस्य शासनकाले प्रजाः सर्वाः सुखेन आसन् । वृद्धस्य राज्ञः मनसि कदाचित् विचारः उदितः यत् प्रजाः मां यथा स्मरेयुः तथा किमपि करणीयम् इति ।

सः झटिति चतुरः मन्त्रिणः आहूय अवदत् - ''प्रजाः मां चिरकालं स्मरेयुः इति मम इच्छा । मम शासनस्य प्रशंसां ते सदा कुर्युः । एतदर्थं किमपि निर्मापयितुम् इच्छामि अहम् । कीदृशं स्मारकं निर्मितं चेत् इष्टसिद्धिः भवेत् इति भवन्तः वदन्तु तावत्'' इति ।

तदा विष्णुशर्मा नाम वृद्धः मन्त्री उत्थाय अवदत् - ''महाराज ! अमूल्याभिः श्वेतशिलाभिः अपूर्वस्य कस्यचित् मन्दिरस्य निर्माणं कार्यताम्'' इति ।

''तस्मिन् विशिष्टे भवने रत्नादीनां योजनम् अपि भवेत् चेत् वरम् । यदा यदा तत् दृश्यते तदा तदा भवतः वैभवम् अपि जनैः स्मर्येत । स्मरणं यदा भवेत् तदा प्रशंसा अपि स्यात् एव । तेन भवतः कीर्तिः चिरस्थायिनी भवेत्'' इति अवदत् अनन्तशर्मा नाम मन्त्री ।

ततः वेदशर्मा नाम तृतीयः मन्त्री अवदत् - ''तस्मिन् मन्दिरे सुवर्णेन निर्मिता भवतः प्रतिमा अपि भवेत् । तस्य दर्शनात् प्रजाः भावयितुम् अर्हन्ति यत् अस्माकं राजा सजीवं तिष्ठति इति'' इति ।

एवं त्रिभिः मन्त्रिभिः स्वाभिप्रायः प्रकटितः चेदपि चतुर्थः मन्त्री मणिभद्रः तूष्णीं स्थितवान् आसीत् ।

अतः राजा शिववर्मा तम् अपृच्छत् - ''मणिभद्रवर्य ! किमर्थं भवता किमपि न उक्तम् एव ? एतद्विषये भवतः अभिप्रायः कः ?'' इति ।

तदा मणिभद्रः स्पष्टशब्दैः अवदत् - ''त्रिभिः अपि मन्त्रिभिः स्मारकविषये यत् उक्तं तत् युक्तम् एव । भव्यं स्मारकं कीर्तिं विस्तारयति इत्यत्र नास्ति सन्देहः । किन्तु वैभवमात्रस्य स्मारणात् प्रजाः सन्तुष्टाः भवेयुः

इति नास्ति । अन्यच्च, कस्य स्थितिः कदा कीदृशी भवेत् इति कोऽपि न जानाति । कदाचित् देशे महत् कष्टम् एव उपस्थितम् इति चिन्तयाम, तदा वैभवस्मारकं जनाः निन्देयुः अपि । अतः मम तु भाति यत् वैभवस्मारकस्य निर्माणं यथा तथैव प्रजोपकारकं महत् कार्यम् अपि किमपि करणीयम् इति । भव्यं मन्दिरं तु भवतु । तत् परितः विशालम् उद्यानम् अपि भवतु । तच्च उद्यानं पुष्पलताभिः वृक्षैः च पूर्णं भवतु । तस्य अन्तः विश्रामगृहाणि अपि भवन्तु । तेन यात्रिकाः रात्रौ वासं कर्तुं शक्नुयुः'' इति ।

एतत् अङ्गीकुर्वन् राजा अवदत् - ''मणिभद्रेण युक्तम् एव उक्तम् । वैभवस्मारकं मन्दिरं कीर्तिं वर्धयति इति तु सत्यम् । किन्तु तत् अशाश्वतम् । प्रजानां हिताय कृतं कार्यं कदापि व्यर्थं न । अतः अद्यैव भवतारिणी-नद्याः तीरे नगरात् अनतिदूरे विशाले प्रदेशे सुन्दरस्य कस्यचन उपवनस्य निर्माणस्य आरम्भः भवतु । लतावृक्षादीनाम् आरोपणम् आदौ भवतु । तस्य मध्यभागे भव्यस्य भवनस्य निर्माणं भवतु'' इति ।

राज्ञः आदेशस्य अनुसारं मणिभद्रस्य मार्गदर्शने विशालस्य वनस्य निर्माणम् आरब्धम् । असंख्याः सस्यलतादयः तत्र आरोपिताः । ततः वर्षाभ्यन्तरे राजा परं धाम श्रितवान् । मन्दिरस्य मध्यभागे श्वेतशिलया अपूर्वं मन्दिरं निर्मितम् । मन्दिरस्य अन्तः सुवर्णनिर्मिता राज्ञः प्रतिमा अपि प्रतिष्ठापिता ।

वर्षाणि गतानि । चत्वारः मन्त्रिणः अपि दिवं गताः । मन्दिरस्था स्वर्णप्रतिमा चोरैः चोरिता । रत्नादयः अपि अपहृताः अभवन् । प्रतिमायाः अभावात् भवने जनानाम् आस्था न्यूना जाता । गच्छता कालेन तत् भवनं शिथिलं जातम् अपि ।

एतत्सर्वं जातं चेदपि मणिभद्रेण कारितं सुन्दरम् उपवनं तु न विनष्टम् । वृक्षाणां छायासु उपविश्य जनाः श्रमपरिहारं कुर्वन्ति स्म । वासगृहेषु वसन्तः पथिकाः मार्गायासस्य परिहारं प्राप्नुवन्ति स्म । उपवनस्थानि पुष्पाणि जनानां मनः अपहरन्ति स्म । एवं स्मारकभवने विनष्टे जाते अपि राज्ञा निर्मापितम् उपवनं जनैः बहुधा सेव्यमानं सत् तदीयां स्मृतिम् अखण्डतया जनेषु जनयति स्म ।

अनुचितः उच्चनीचभावः

ब्रह्मदत्तः यदा काशीराज्यं परिपालयन् आसीत् तदा बोधिसत्त्वः सिंहरूपेण जन्म प्राप्तवान् । सः पत्नीसमेतः पर्वतगुहायां निवसति स्म ।

कदाचित् सः आहारप्राप्त्यर्थं पर्वतात् अधः आगतवान् । पर्वतमूले सरोवरसमीपे तृणमये परिसरे केचन हरिणाः शशाः च तेन दृष्टाः । गर्जनं कुर्वन् सः हरिणान् ग्रहीतुम् अधावत् । एवं धावनसमये अनवधानवशात् सः पङ्कराशौ अपतत् । सिंहं दृष्टवन्तः हरिणाः शशाः च भीताः सन्तः वेगेन ततः पलायनम् अकुर्वन् ।

पङ्कात् बहिः आगमनाय सिंहः बहुधा प्रयत्नम् अकरोत् । किन्तु ततः किमपि प्रयोजनं न सिद्धम् । साहाय्यं कर्तुं किं कोऽपि सौभाग्य-वशात् अत्र आगच्छेत् इति प्रतीक्षमाणः अतिष्ठत् सिंहः ।

सप्ताहं यावत् तेन तत्रैव स्थितम् । बुभुक्षा निश्शक्तिः इत्यादयः तम् अबाधन्त ।

अथ एकदा जलपानाय कश्चन शृगालः तस्य सरोवरस्य समीपम् आगतः । सः सिंहं दृष्ट्वा नितरां भीतः जातः ।

तदा सिंहः तम् अवदत् – ''मित्र ! आ सप्ताहात् अहम् अत्र पङ्के पतितः अस्मि । मम मरणं सन्निहितम् इव । कृपया मां कथमपि रक्षतु'' इति ।

''भवान् तु नितरां बुभुक्षितः । यदि अहं भवन्तं रक्षेयं तर्हि मां निश्चयेन खादेत् एव भवान् । एवं स्थिते भवति कथम् अहं विश्वासं कुर्याम् ?'' इति अपृच्छत् शृगालः ।

''यः मम प्राणान् रक्षेत् तम् अहं सर्वथा न खादिष्यामि । यदि इतः भवान् मां रक्षेत् तर्हि अहम् आजीवनं भवतः उपकारं स्मरेयम् । कृपया मां रक्षतु'' इति दैन्येन प्रार्थितवान् सिंहः ।

शृगालः तस्य वचने विश्वस्य शुष्कान्

काष्ठखण्डान् सङ्गृह्य पङ्कगर्ते अपातयत् । तेषाम् उपरि पदं स्थापयित्वा सिंहः कथमपि उपरि आगतवान् ।

ततः उभौ अपि सम्भूय मृगयार्थं गतवन्तौ । सिंहः अल्पेन एव प्रयासेन कञ्चित् प्राणिनम् अमारयत् । उभौ अपि सन्तोषेण खादितवन्तौ ।

''इतः परम् आवां सहोदरौ इव वसाव । भवान् सपरिवारं मम गुहायाम् एव वसतु नाम । तेन च आवयोः मैत्री दृढा भवेत्'' इति अवदत् सिंहः ।

शृगालः एतं प्रस्तावं महता सन्तोषेण एव अङ्गीकुर्वन् पत्न्या सह सिंहस्य गुहां प्रति आगतवान् ।



सिंहेन सह वासः गौरवाय इति शृगालः जानाति स्म । अतः एव सिंहस्य प्रस्तावः अङ्गीकृतः आसीत् तेन । किन्तु सः एतत् अपि जानाति स्म यत् जातिबान्धवेभ्यः दूरे वासतः कीदृशानि कष्टानि सम्मुखीकरणीयानि भवेयुः इति । सिंहः शृगालस्य उदारतां सम्यक् जानाति स्म । अतः कदापि शृगालस्य खेदः यथा न भवेत् तथा जागरूकतया व्यवहरति स्म सः ।

किन्तु शृगाले सिंहस्य यावती प्रीतिः तावती एव प्रीतिः शृगाल्यां न आसीत् सिंह्याः । सा चिन्तयति स्म – 'वयं तु उच्चकुलीयाः, शृगालाश्च निम्नकुलीयाः' इति । शृगाली सिंह्याः एतं वादं विना विरोधम् अङ्गीकृतवती । तस्मात् तयोः कलहः तु कदापि न जातः एव ।

दिनानि गतानि । सिंहेन शृगालेन च अपत्यानि प्राप्तानि । तानि अपत्यानि सर्वदा सहैव आनन्देन क्रीडन्ति स्म । सिंही एतत् न असहत ।

सिंह-शृगालयोः अपत्यैः न ज्ञायते स्म यत् अस्मासु कुलतारतम्यम् अस्ति इति । अतः तैः स्नेहेन क्रीड्यते स्म । तेषु उच्चनीचभावः कोऽपि न दृश्यते स्म ।

सिंही एतस्मात् नितरां खिन्ना जाता । सा कदाचित् पुत्रान् अबोधयत् – ''वयम् उच्चकुलीयाः । शृगालपुत्राः च नीचकुलीयाः । अतः तैः सह भवद्भिः न क्रीडनीयम् । तेभ्यः दूरे स्थातव्यं भवद्भिः । स्नेहः समेषु एव शोभते, न विषमेषु'' इति ।

सिंह्याः एतत् बोधनं तस्याः पुत्रेषु प्रभावम् अजनयत् । अतः ते क्रीडादिसमये भेदभावम् आरब्धवन्तः । अन्याय्यव्यवहारम् अपि कृतवन्तः ते । कदाचित् ते शृगालपुत्रान् अवदन्

- ''वयम् उच्चकुलीयाः । वयम् एव भवतां पालनपोषणादिकं कुर्मः । अतः वयं यत् वदामः तस्य विरोधः न करणीयः भवद्भिः । भवन्तः तु नीचकुलीयाः । अस्माभिः निन्दनं कृतं चेदपि तत् विना विरोधं श्रोतव्यं भवद्भिः'' इति ।

एतत् ज्ञातवती शृगाली कदाचित् पतिं प्रवृत्तं सर्वम् अवदत् । अनन्तरदिने मृगयार्थं गमनसमये शृगालः सिंहम् अवदत् - ''भवन्तः उच्चकुलीयाः । वयं च सामान्याः । अतः आवयोः कुटुम्बयोः सहस्थितिः न शोभते । इतः परं वयं जातिबान्धवैः सह वसामः'' इति ।

मित्रे जातम् एतत् आकस्मिकं परिवर्तनं दृष्ट्वा सिंहः महत् आश्चर्यं प्राप्तवान् । अतः सः तम् एतस्य कारणम् अपृच्छत् । शृगालः प्रवृत्तं सर्वं न्यवेदयत् ।

रात्रौ गुहां प्रत्यागतः सिंहः पत्नीम् अवदत् - ''भवती शृगालपुत्रेषु घृणां वहति इति श्रुतं मया । किम् एतत् सत्यम् ?'' इति ।

''आम् ! निम्नजातीयैः सह मम पुत्राणां क्रीडनम् अहं सर्वथा न सहे । तेन वराकेण शृगालेन किं वशीकरणतन्त्रम् आश्रितम् इति न ज्ञायते । सर्वदा तस्य प्रंशसा क्रियते भवता । शृगालपुत्रैः सह मम पुत्राणां क्रीडनं सर्वथा न रोचते मह्यम्'' इति अवदत् सिंही ।

''शृगालेन किं कृतम् इति पृष्टं खलु भवत्या ? वदामि, शृणोतु । पूर्वं कदाचित् सप्ताहं यावत् अहं गृहं न आगतः इत्येतत् भवती स्मरेत् एव खलु ? तदवसरे पङ्के पतितः अहं बुभुक्षाकारणतः प्राणवियोगदशां प्राप्तवान् आसम् । तदा एतेन शृगालेन एव अहं रक्षितः । यदि तस्मिन् दिने तेन साहाय्यं कृतं न स्यात् तर्हि इदानीं मम सजीवस्थितिः न अभविष्यत् लोके । भवत्याः जीवनम् अपि कष्टकरम् अभविष्यत् । यः प्राणरक्षणं कृतवान् तस्मिन् उच्चनीचभावस्य प्रदर्शनं पापाय । तस्य अपमाननं न हि श्रेयसे'' इति पत्नीं बोधितवान् सिंहः ।

स्वस्य दोषम् अवगतवती सिंही शृगालीं क्षमाम् अयाचत ।

एतदनन्तरं सिंहकुलीयाः शृगालकुलीयाः च स्नेहेन जीवन्तः सुखमयं जीवनं यापितवन्तः ।



रामायणम्

भरतः पितुः मरणेन कञ्चित् कालं यावत् रोदनं कृतवान् । ततः सः मातरं पृष्टवान् - ''अम्ब ! अन्तिमेषु दिनेषु पित्रा किमपि उक्तं किम् ? किम् उक्तम् आसीत् तेन ?'' इति ।

''राम ! लक्ष्मण ! सीते ! इति वदन् एव प्राणैः वियुक्तः अभवत् सः'' इति उक्तवती कैकेयी ।

तदा भरतः आश्चर्येण पृष्टवान् - ''किम् एतत् ? रामः सीता, लक्ष्मणः च तस्मिन् क्षणे किं समीपे न आसन् ? ते कुत्र आसन् तदा ?'' इति ।

''तावता ते वनवासाय गतवन्तः आसन् खलु ? रामः यदा वल्कलानि धृत्वा वनवासार्थं प्रस्थितवान् तदा सीता लक्ष्मणः च तम् एव अनुसृत्य गतवन्तौ'' इति उक्तवती कैकेयी मन्दस्वरेण ।

भरतः इतोऽप्यधिकेन आश्चर्येण पृष्टवान् - ''रामेण किं पापम् अनुष्ठितम् आसीत्, येन वनगमनं प्राप्तं भवेत् ? सः दुष्कर्म किमपि न करोति । प्राणहरणापराधं कृतवते इव तस्मै एतादृशं घोरं वनगमनदण्डनं किमर्थं विहितम् ? तादृशम् अत्र किं प्रवृत्तम् ?'' इति ।

''तथा कोऽपि अपराधः न कृतः तेन । तस्य पट्टाभिषेकसन्नाहः प्रवर्तमानः अस्ति इति यदा ज्ञातं मया वरद्वयं याचितं - रामः वनवासार्थं गच्छेत्, भवान् च सिंहासनारूढः भवेत् इति । एतत् महाराजेन अन्वमन्यत । अतः एतत् सर्वं प्रवृत्तम् । अग्रे यत् अनुष्ठातव्यं तद्विषये चिन्तां मा करोतु भवान् । तत् सर्वं वसिष्ठादयः चिन्तयिष्यन्ति । भवान् सन्तोषेण

पट्टाभिषेकाय सज्जः भवतु'' इति उक्तवती कैकेयी ।

कैकेय्याः वचनस्य श्रवणेन भरते महान् क्रोधाग्निः उत्पन्नः ।

''भवत्या पत्युः प्राणा हृताः, रामः च वनं प्रति प्रेषितः । एतादृशम् अकार्यम् अनुष्ठितवत्याः भवत्याः मुखस्य दर्शनम् अपि पापाय एव । क्षत्रियाणां धर्मः – ज्येष्ठः पुत्रः एव सर्वप्रथमं राजत्वम् अर्हति इति । एतत् भवत्या किं न ज्ञातम् ? रामलक्ष्मणाभ्यां विना राज्यशासनं कथं कर्तुं शक्नुयाम् ? इदानीम् एव वनं गत्वा प्रत्यागम्यताम् इति रामं निवेद्य तम् एव राजानं कृत्वा अहं तस्य सेवकः भविष्यामि'' इति मातरं सोद्वेगम् उक्तवान् भरतः ।

''भवान् यदि अत्र न भवेत् तर्हि मम का गतिः ?'' इति रोदनपुरस्सरं पृष्टवती कैकेयी ।

तदा भरतः क्रोधेन अवदत् – ''मां किमर्थं पृच्छति भवती ? गच्छतु ! अग्निप्रवेशं करोतु । अथवा क्वचित् अरण्ये जीवतु । अथवा स्वयं शिरः छित्त्वा मरणं प्राप्नोतु'' इति ।

तावता तत्र उपस्थितः अभवत् मन्त्री । तम् अपि भरतः स्पष्टम् अवदत् – ''राज्यैषणा मया न कदापि कृता, नवा एतादृशम् अनुचितः वरः याचताम् इति माता प्रेरिता'' इति ।

भरतः शत्रुघ्नः वा न जानाति स्म यत् रामः लक्ष्मणः सीता च किमर्थं वनं गतवन्तः इति । यतः तौ दूरस्थे अन्यस्मिन् देशे आस्ताम् ।

ततः भरतः शत्रुघ्नः च कौसल्यायाः निकटं गतवन्तौ । तस्याः आलिङ्गनं कृत्वा उभाभ्याम् अपि रुदितम् ।

कौसल्या कैकेय्या कृतं समग्रं विवृतवती । कौसल्यायाः कथनं श्रुत्वा भरतः अचिन्तयत् यत् एषा माम् अपि स्वभावेन मातृसदृशं भावयन्ती अस्ति, मात्रा यद्यत् कृतं तत् सर्वं मया अनुमतम् इति एतस्याः चिन्तनम् इति । अतः तस्य दुःखम् उद्गतम् । तदा कौसल्या विविधैः सान्त्वनवचनैः तं बहुधा समाश्वासितवती ।

दुःखसागरे निमग्नं भरतं गुरुः वसिष्ठः अवदत् – ''वत्स ! दुःखाग्निना ज्वलन्तम् आत्मानं नियन्त्र्य भवान् पितुः अन्त्यसंस्कार-विधेः निर्वर्तनं चिन्तयतु'' इति ।

रासायनिकरक्षकतः बहिः आनीतं पितुः शरीरं दृष्ट्वा भरतः – ''तात ! भवान् तु

दिवङ्गतः । अग्रजः सोदरेण सह वनवासार्थं गतवान् । भवतोः अनुपस्थितौ कथम् अहं राज्यभारं वहानि ?'' इति रुदितवान् ।

पुष्पैः सज्जेन शवयानेन दशरथस्य मृतदेहः नीयमानः आसीत् । तस्य पुरतः नागरिकाः स्वर्णरजतादीनि नाणकानि विकिरन्तः सुगन्ध-वर्तिकाः च गृहीत्वा गच्छन्तः आसन् । दश-रथस्य पत्न्यः अपि रुदत्यः एव जनसमूहम् अनुसृतवत्यः । भरतेन सह ताः अपि चितायाः प्रदिक्षिणां कृतवत्यः । श्मशाने चितायाः दाहः आरब्धः । आगताः जनाः सर्वे स्वीयं गृहं प्रति प्रस्थितवन्तः ।

भरतः दश दिनानि यावत् पितृशोकाकुलः सन् यापितवान् । श्राद्धादिकर्म यथाविधि कृत्वा सः ब्राह्मणेभ्यः अन्नस्य वस्त्रस्य च दानं कृत-वान् । त्रयोदशे दिने भरतः अस्थिसञ्चयनार्थं यदा गतवान् तदा तेन सह गतः शत्रुघ्नः पितुः स्मरणेन साश्रुपातं रुदितवान् ।

तदनन्तरं कञ्चित् समयं तौ एकत्र उपविश्य परस्परं विचारविनिमयम् अकुरुताम् । ''भ्रातुः वनवासम् आदिशन्तं पितरं लक्ष्मणः कथं न अवरुद्धवान् ?'' इति शत्रुघ्नः अपृच्छत् भरतम् आश्चर्यं प्रकटयन् ।

तावता दासी मन्थरा आत्मानं राज्ञीम् इव अलङ्कृत्य वृद्धकपिवत् प्रासादं प्रविष्टवती महता सन्तोषेण ।

द्वारपालकौ तां गृहीत्वा शत्रुघ्नस्य समीपम् आनीतवन्तौ । ''गृह्यतां दृढं तावत् एषा । एषा एव सर्वेषाम् अकार्याणां मूलम् अस्ति'' इति उक्तवन्तौ तौ । शत्रुघ्नः क्रोधाविष्टः सन् ताडनोद्देशेन यदा तां गृहीतवान् तदा तया सह

स्थिताः परिचारिकाः भीताः भूत्वा धावन्त्यः कौसल्यायाः समीपम् आगतवत्यः ।

प्राणापायभीत्या चीत्कुर्वतीं मन्थरां रक्षितुं कैकेयी उपस्थिता । शत्रुघ्नः कैकेयीम् अपि बहुधा निन्दितवान् । अतः सा भरतं तत्र आनायितवती ।

भरतः शत्रुघ्नम् उक्तवान् – ''भवान् स्त्री-वधार्थम् उद्युक्तः अस्ति । एतत् अग्रजः रामः यदि जानीयात् तर्हि आवयोः मुखं न पश्येत् एव । रामः क्रुद्धः मा भवतु इत्येतेन एकेन एव उद्देशेन अहं कैकेयीं न मारितवान् । अन्यथा एतावता तस्याः भूलोकतः निर्गमनम् अभविष्यत् एव । तां कुब्जां त्यजतु भवान्'' इति ।

दशरथस्य दिवङ्गमनस्य अनन्तरं चतुर्दशे दिने नगरस्य गण्याः भरतम् उद्दिश्य अवदन्

CHANDAMAMA INDIA LTD. LIBRARY 11/12 DEC-2006

– ''राज्यस्य कोऽपि नायकः नास्ति इदानीम् । अराजकता न आरब्धा इत्येतत् एव भाग्यम् अस्माकम् । अतः त्वरितम् एव भवान् अभिषिक्तः भवेत्'' इति ।

''अस्माकं सनातनी परम्परा वदति – ज्येष्ठः पुत्रः एव उत्तराधिकारी भवेत् इति । अतः मम राज्याभिषेकः भवतु इति भवताम् एषा अपेक्षा सर्वथा अनुचिता एव । किरीटं न धरामि अहम् । वनं गत्वा श्रीरामं राजानं कृत्वा आनेष्यामि, तेन यः वनवासः कर्तव्यः सः मया करिष्यते । अरण्ये एव अग्रजस्य पट्टाभिषेकः भविष्यति । अतः तदर्थम् अपेक्षितानां वस्तूनां सङ्ग्रहं कृत्वा मया सह प्रेषयितुं व्यवस्था क्रियताम्'' इति नगरगण्यान् अवदत् भरतः ।

भरतस्य वनं प्रति गमनाय महान् सन्नाहः आरब्धः । दुर्गमप्रदेशेषु अपि वृक्षच्छेदनपूर्वकं नूतनः मार्गः कल्पितः । नदीनां क्रमणाय सेतवः निर्मिताः । मार्गेषु उत्पन्नाः गर्ताः मृत्तिकया पूरिताः । समीचीनेषु स्थानेषु शिबिरकल्पनाय व्यवस्थाः रूपिताः, कूपाः अपि खाताः । मार्गे कुटीरनिर्माणं कृत्वा वीथीनिर्माणं कृतम् इति कारणेन नूतनाः ग्रामाः एव प्रकल्पिताः अभवन् इव । एतादृशानां शिबिराणां पङ्क्तिः सरयूनदीतटतः गङ्गानदीतटं यावत् प्रसृता आसीत् ।

तस्य दिनस्य रात्रौ जातेन शङ्खोद्घोषेण, पणवनादेन, स्तोत्रेण च जागरणं प्राप्य भरतः अवदत् – ''मया स्तोत्रं न अपेक्ष्यते, न वा वाद्यानां वादनम् । यतः अहं राजा नास्मि'' इति ।

भरतस्य राज्याभिषेकस्य सन्नाहे मग्नः वसिष्ठः कतिपयैः कर्मचारिभिः सह राजसभां प्राविशत् । नगरप्रमुखं, मन्त्रिणं, गणनायकान्, भरतं, शत्रुघ्नं च आकारयितुं दूतः प्रेषितः तेन ।

अविलम्बेन एव राजसभायाः अलङ्कारः तथा कृतः, यथा दशरथः राजसभायाम् उपस्थाय सभायाः निर्वहणं कुर्वन् अस्ति इति प्रतीयेत ।

सभासदां समक्षे वसिष्ठः भरतं न्यवेदयत् – ''भवान् राज्याभिषिक्तः भवतु'' इति ।

इतः पूर्वं यत् उक्तम् आसीत् तदेव पुनः उच्चारितं भरतेन । ''श्रीरामं वनतः प्रत्यानेतुं यथाशक्ति प्रयत्नं करिष्यामि इति भवतां समक्षे प्रतिजाने । सः आगन्तुं न इच्छति चेत् अहम् अपि लक्ष्मणः इव तत्रैव भविष्यामि । तत्र

गन्तुम् एतावता एव सर्वविधाः सज्जताः कृताः सन्ति । मार्गनिर्मातारः, कुटीरकल्पकाः च अग्रे प्रस्थिताः सन्ति । मम प्रस्थानमात्रम् अवशिष्टम् अस्ति'' इति अवदत् ।

भरतस्य कथनेन सन्तुष्टाः अभवन् सर्वे । यात्रायाः सन्नाहाय सुमन्त्रः सेनाध्यक्षं न्ययोजयत् । गताः प्राणाः पुनः आयाताः इव अयोध्यायां पुनरपि नवः उत्साहः प्रसृतः ।

तदनन्तरदिनस्य प्रातः एव भरतः उत्थाय यात्रारम्भम् अकरोत् । नवसहस्रं गजाः, षष्टिसहस्रं रथाः, लक्षम् अश्वाः, असङ्ख्याः योद्धारः च तेन सह प्रस्थिताः ।

कौसल्या, सुमित्रा, कैकेयी च स्वयानैः प्रस्थानं कृतवत्यः । तावता कैकेयीं प्रविष्टः पिशाचः तस्याः निर्गतः आसीत् । आत्मना कृतस्य घोरस्य अपराधस्य निमित्तं पश्चात्तापम् अनुभवन्ती सा व्याकुला सती अग्रे गच्छन्ती आसीत् ।

रामस्य दर्शनं प्राप्तव्यम् इति इच्छावन्तः बहवः जनाः समूहशः भरतम् अनुसृतवन्तः । सहस्रशः विप्राः अपि वृषभशकटैः भरतेन सह यात्रारम्भम् अकुर्वन् ।

एतावता जनसम्मर्देन सह भरतः गङ्गातीरस्थं शृङ्गवेरपुरं प्राप्तवान् । तत्र तत्र आवासं कल्पयन्तु इति सेनां सूचयित्वा सः मन्त्रिणः अवदत् - ''अद्य रात्रौ वयम् अत्रैव विश्रामं करवाम । श्वः गङ्गानद्याः अतिक्रमणं भवतु । इदानीं नद्याम् अवतीर्य पितृतर्पणं करोमि अहम्'' इति ।

गङ्गातटे अपारायाः सेनायाः उपस्थितिं दृष्ट्वा

आश्चर्यं प्राप्तवान् गुहः भरतस्य रथस्य दर्शनेन तम् अभिज्ञातवान् । सः स्वीयान् जनान् आहूय अवदत् - ''भरतः एतावता सेनाबलेन सह किमर्थम् आगतवान् इति न ज्ञायते । 'वनवासतः प्रत्यागत्य राज्यशासनाधिकारं प्राप्नुयात् रामः । अतः सः हन्तव्यः' इति दुरुद्देशेन एव आगतवान् स्यात् अयम् । प्राणैः कण्ठगतैः अपि श्रीरामः रक्षणीयः एव अस्माभिः । अविलम्बेन पञ्चशतं नौकाः सज्जाः क्रियन्ताम् । प्रत्येकस्यां नौकायाम् अपि शतं जनाः भवन्तु । एवं सज्जाः सन्तः भवन्तः गङ्गायाः तीरे उपस्थिताः भवन्तु । नौकासु अन्नास्त्रादिकम् अपि पूर्यताम् । रामस्य हानिः भरतेन अनुद्दिष्टा चेत् अग्रे गमनाय अवसरं कल्पयाम । अन्यथा तस्य सेनाबलम् अत्रैव अवरुद्ध्य युद्धं करवाम'' इति ।

सर्वाः व्यवस्थाः कृत्वा गुहः मत्स्य-मांस-मधु-मूलादिकं गृहीत्वा भरतेन मेलितुम् आगतवान् । आगच्छन्तं गुहम् अवलोक्य सुमन्त्रः भरतम् अवदत् - ''श्रीरामस्य सुहृत् एषः भवतः मेलनाय आगच्छन् अस्ति । सर्वविधसमर्थः अस्ति एषः अरण्यराजः । एतस्य आदरेण सत्कारेण च रामस्य वाससङ्केतः प्राप्तुं शक्यः'' इति ।

''तं गुहं मम समीपम् आनयतु'' इति संसूच्य भरतः सुमन्त्रं ततः प्रेषितवान् ।

गुहः भरतस्य निकटं प्राप्य आनीतं तस्मै उपहारीकृत्य - ''भवताम् आगमनसूचना पूर्वम् एव यदि मया प्राप्ता स्यात् तर्हि अहं सवैभवं स्वागतव्यवस्थाम् अकरिष्यम् । रात्रौ अस्माकम् आतिथ्यं प्राप्य एव अग्रे गम्यताम्'' इति भरतम् अवदत् ।

तदा भरतः गुहम् उक्तवान् - ''प्रभो ! एतादृशस्य जनसमूहस्य सत्कारार्थम् उद्युक्तस्य भवतः वचनेन एव वयं हृष्टाः । ततोऽप्यधिकं गौरवं किम् अन्यत् अपेक्ष्येत ? भारद्वाजमुनेः आश्रमस्य दिशि गन्तुम् उद्युक्तानाम् अस्माकं मार्गनिर्देशनं क्रियतां कृपया । इतः अग्रे गमनाय मार्गः दुर्गमः इति श्रूयते'' इति ।

''अस्मदीयाः हस्ताभ्यां बाणादिकं गृहीत्वा भवद्भिः सह आगमिष्यन्ति । अहम् अपि भविष्यामि एव इत्यतः मार्गस्य अन्वेषणस्य आवश्यकता न भविष्यति'' इति अवदत् गुहः ।

परबुद्धिः विनाशाय..

देवराजः कश्चन निर्धनः जनः । परम्परातः प्राप्तः पुरातनः कश्चन कुटीरः एव तस्य सम्पत्तिः । कुटीरस्य पृष्ठभागे स्थितं क्षेत्रं श्रमेण समीकृत्य सः तत्र कदलीसस्यानि आरोपितवान् । गच्छता कालेन तत्र काचित् वाटिका निर्मिता अभवत् ।

कदाचित् प्रातःकाले देवराजः यदा जलेन सस्यानि सिञ्चन् आसीत् तदा एव तस्य ग्रामस्य भूस्वामिनः पत्नी वृषभशकटेन आगत्य तत्र अवतीर्य –''भोः, एतस्य कुटीरस्य वाटिकायाः च विक्रयणं क्रियते किम् ?'' इति पृष्टवती ।

एतत् श्रुत्वा देवराजः महत् आश्चर्यम् अनुभवन् निरुत्तरः सन् मौनेन स्थितवान् ।

''मूल्यविषये निश्चिन्तः भवतु भवान् । भवते पञ्चशतं रूप्यकाणि दास्यामि'' इति अवदत् भूस्वामिनः पत्नी ।

देवराजः स्वीययोः कर्णयोः एव विश्वासं न प्राप्तवान् । यतः सः जानाति स्म यत् मम कुटीरः द्विशतरूप्यकात्मकं मूल्यम् अपि न अर्हति इति ।

तूष्णीं स्थितं देवराजम् उद्दिश्य भूस्वामिपत्नी पुनः अवदत् – ''अस्तु, सार्धसप्तशतं रूप्यकाणि दास्यामि अहम् । मूल्यविषये दोलायमानं मनः दृढीकृत्य भवान् एतस्य विक्रयणे मतिं करोतु'' इति ।

'एतावान् धनराशिः यदि प्राप्येत तर्हि तावत् धनं मूलधनत्वेन उपयुज्य मया किमपि वाणिज्यम् आरम्भणीयम् । तदा तु मम जीवनं निश्चिन्तं भवेत्' इति अचिन्तयत् सः ।

तदा ईषदिव क्रुद्धा भूस्वामिनः पत्नी – ''भवतः एषः कुटीरः अधिकं मूल्यं न अर्हति इति अहं जानामि । तथापि अधिकं मूल्यं दातुम् अहं सिद्धा जाता अस्मि । एषः मम अन्तिमः निर्णयः । सहस्रं रूप्यकाणि दास्यामि । एतावत् धनं स्वीकृत्य किं भवान् कुटीरविक्रयणं कुर्यात् ?'' इति पृष्टवती ।

पञ्चविंशतिवर्षेभ्यः पूर्वं चन्दमामायां प्रकाशिता कथा

देवराजः शिरश्चालनपूर्वकं विक्रयणसम्मतिं सूचितवान् । तदा भूस्वामिपत्नी उक्तवती - ''अद्य सायम् अहं कर्मकरद्वारा धनं प्रेषयिष्यामि । तदभ्यन्तरे भवान् कुटीरं रिक्तीकरोतु'' इति उक्त्वा शकटम् आरुह्य ससन्तोषं ततः अग्रे गतवती ।

देवराजः अनुक्षणं पत्नीम् आहूय उक्तवान् - ''अये ! अद्य भाग्यलक्ष्मीः कृपाकटाक्षेण अस्मान् अनुगृहीतवती अस्ति'' इति ।

भूस्वामिनः शकटः देवराजस्य कुटीरस्य पुरतः यदा स्थितः ततः आरभ्य तत्रत्याः प्रतिवेशिनः सोत्साहं प्रवर्तमानं पश्यन्तः आसन् । भूस्वामिपत्न्याः निर्गमनस्य अनन्तरं केचन देवराजस्य समीपम् आगत्य अवदन् - ''किं भवान् स्वकुटीरं विक्रेतुम् उद्युक्तः अस्ति ?'' इति ।

''आम् । यदि एतस्य जीर्णस्य कुटीरस्य विक्रयणतः सहस्रं रूप्यकाणि प्राप्येरन् तर्हि कथं वा मया विक्रयणे मनः न क्रियेत ?'' इति प्रतिप्रश्नं कृतवान् देवराजः ।

''भोः, भवतः मतिः किं विकृतिं गता ? एतादृशाय कुटीराय सहस्रं रूप्यकाणि दातुं तया किमर्थम् उद्युक्तं स्यात् ? महालाभः यदि न स्यात् तर्हि किमर्थं सा एतं जीर्णं कुटीरं तावता मूल्येन क्रीणीयात् ? भवतः कुटीरे कोऽपि महानिधिः निखातः स्यात् । अतः भवान् स्वयम् एव तं निधिं प्राप्नोतु'' इति बोधितवन्तः ते प्रतिवेशिनः ।

एतेषां वचनानि औचित्यपूर्णानि सन्ति इति अमन्यत देवराजः । तस्य पत्नी अपि प्रतिवेशिनां कथने विश्वस्य अवदत् - ''एतैः जनैः यत् उच्यते तत् युक्तम् इति प्रतीयते । भूस्वामिपत्नी अपि स्वपुत्र्याः विवाहं कारयितुं प्रयत्नं कुर्वती अस्ति । तदर्थं महतः धनराशेः आवश्यकता स्यात् एव । अतः एव निधिप्राप्त्यर्थं तया एषा योजना कृता स्यात्'' इति ।

सायं भूस्वामिपत्न्या प्रेषितः जनः सहस्रं रूप्यकाणि गृहीत्वा दातुं यदा आगतः तदा तौ दम्पती कुटीरविक्रयणं निराकृतवन्तौ ।

तदनन्तरं रात्रौ दीपस्य प्रकाशे देवराजः एकैकशः कदलीसस्यानि उत्पाट्य क्षिप्तवान् । समग्रे क्षेत्रे खननं कृतं, कुटीरस्य अन्तः अपि अन्विष्टं च । तथापि तेन किमपि न प्राप्तम् ।

तावता प्रातःकालः उपस्थितः आसीत् । देवराजेन रुदता इव उक्तम् - ''हस्तम् आगतः सुवर्णावसरः इदानीं च्युतः अभवत्'' इति ।

''तथा मा चिन्तयतु भवान् । अवसरः हस्ते एव अस्ति । भवान् सत्वरम् एव प्रस्थाय

भूस्वामिनीं वदतु - कुटीरविक्रयणाय सिद्धः अस्मि इति । पञ्चशतं रूप्यकाणि दीयेरन् चेदपि कुटीरविक्रयणम् अङ्गीक्रियताम्'' इति अबोधयत् तस्य पत्नी ।

देवराजः झटिति एव भूस्वामिनः गृहं गत्वा भूस्वामिपत्नीम् अवदत् - ''जनानां वचनेषु विश्वस्य ह्यः सायं कुटीरस्य विक्रयणं निराकृतं मया । वस्तुतः इदानीं मया विवेकः प्राप्तः अस्ति । तस्य विक्रयणं कर्तव्यम् इति सङ्कल्प्य अहम् इदानीम् अत्र उपस्थितः अस्मि । यावत् उचितं मन्येत तावत् मूल्यं दीयताम्'' इति ।

तदा भूस्वामिपत्नी मन्दहासं प्रकटयन्ती - ''इदानीं तस्य क्रयणेन किं प्रयोजनं मम ? मम मत्पतेः च काचित् स्पर्धा आसीत् । तत्र अहं पराजिता अभवम्'' इति उक्त्वा प्रवृत्तं समग्रं विवृतवती - ''भूस्वामिनः कश्चन शकटः अस्ति । विवाहानन्तरं पतिगृहम् आगता अहं ततः आरभ्य अपि पतिं सानुरोधं वदन्ती अस्मि यत् नूतनः शकटः क्रेतव्यः इति । किन्तु भूस्वामिने तु सः पुरातनः शकटः एव रोचते । अतः सः तेन एव अटति । कदाचित् अहं नूतनशकटस्य क्रयणविषये अनुरोधं कृतवती । तदा सः 'परम्परया प्राप्तं त्यक्तुं न कोऽपि इच्छति । ग्रामस्य सीमायां विद्यमानः कदलीसस्यपालकः कृषिकः अपि परम्परातः प्राप्तं पुरातनं कुटीरम् अपि त्यक्तुं न इच्छति । भवती तस्मै महान्तं धनराशिं दद्यात् चेदपि तेन सः कुटीरः न विक्रीयेत' इति उक्तवान् । मया एषः वादः निराकृतः । ततः सहस्र-रूप्यकाणां पणः निश्चितः । किन्तु भवतः निर्णयतः मया पराजयः प्राप्तः'' इति ।

क्षणं विश्रम्य सा पुनः अवदत् - ''भवतः कुटीरस्य कृते सहस्रं रूप्यकाणि दातुम् उद्युक्ता आसम् । यतः कुटीरं क्रीत्वा जयं प्राप्य भू-स्वामिद्वारा नूतनः शकटः क्रापणीयः इति मम विचारः आसीत् । किन्तु मतिरहितानां जनानां वचनेषु विश्वस्य भवता मयि निराशता जनिता । येषां वचनानि श्रुत्वा कुटीरविक्रयणं भवता निराकृतं ते एव मम निकटम् आगत्य स्वकुटीरान् पञ्चशतेन रूप्यकैः विक्रेतुं सिद्धाः आसन् । एतत् किं भवान् जानाति ? 'स्वबुद्धिः सुखाय, परबुद्धिः च विनाशाय' इति उक्तिः सदा स्मर्तव्या'' इति । देवराजः लज्जया शिरः अवनमय्य रिक्तहस्ततया ततः प्रतिगतवान् ।



पलायनस्य कारणम्

भद्रगिरिः रत्नगिरिः च प्रतिवेशिराज्ये आस्ताम् । शताधिकवर्षेभ्यः अपि तयोः राज्ययोः मध्ये वैरभावः सजीवः एव आसीत् । कदाचित् रक्तपातः भवति स्म अपि । राज्यद्वयस्य अपि योद्धारः युद्धशूराः व्यूहरचने कौशलवन्तः चापि आसन् । प्रत्येकस्मिन् अपि युद्धे असङ्ख्याः सैनिकाः प्राणवियोगं प्राप्नुवन्ति स्म उभयोः अपि पक्षयोः । तथापि जयः कस्यापि न भवति स्म ।

अथ कदाचित् भद्रगिरिराज्यस्य राजा अनिरीक्षिततया मरणं प्राप्तवान् । तस्मात् तत्पुत्रः रणधीरः सिंहासनम् आरूढवान् । शत्रुगणं पराजेतुं सङ्कल्पं कृतवान् सः आक्रमणघोषणाम् अकरोत् । दिनद्वयाभ्यन्तरे एव उभयोः अपि पक्षयोः सैनिकाः रणरङ्गे शस्त्राणि गृहीत्वा युद्धाय सज्जाः अभवन् ।

युद्धारम्भक्षणः यावत् सन्निहितः तावता भद्रगिरिपक्षस्य शूरवीरभयङ्करः नाम दलाधिपतिः रणरङ्गतः धावनम् आरब्धवान् । अपरः दलपतिः एतत् दृष्ट्वा तं गृहीतवान् । ततः रणधीरस्य समीपं नीत्वा तस्य ग्रहणस्य कारणम् उक्तवान् सः ।

नेत्राभ्यां क्रोधाग्निं वमन् रणधीरः पृष्टवान् - ''अयि भोः ! भवान् भीमवत् दृढकायः दृश्यते । भवतः दर्शनात् शत्रुः शस्त्रम् उन्नेतुम् अपि भयम् अनुभवेत् । एतादृशेन भवता किमर्थं युद्धारम्भात् पूर्वम् एव भीरुणा इव पलायनं कृतम् ?'' इति

तदा शूरवीरभयङ्करः विनम्रः सन् - ''महाराज ! मम पलायनस्य कारणं भीरुत्वं नैव । रत्नगिरिसैनिकानां सम्मुखीकरणम् असह्यं मम । तेषां मुखदर्शनेन घृणा उत्पद्यते । अतः अहं पलायनम् अकरवम्'' इति अवदत् ।

चित्रम् - गान्धि-अय्यः 9
अपराजेयः गरुडः
वज्रपुर्याः प्रधानमन्त्री पुष्पराजः नरेन्द्रदेवेन, तत्पुत्रेण रवीन्द्रदेवेन च पर्वतगुहासु मिलतः राज्ञः अनुरोधं पुरस्कृत्य । आप्तपुरुषः तत्र आगत्य वार्तां श्रावयति यत् नागबन्धोः आत्मना वनवासिकन्यायां तादृशी शक्तिः पूरिता अस्ति, यया आदित्यारुणयोः विवाहभङ्गः सिद्ध्येत् । पुष्पराजः आत्मना साकं तस्याः कन्यायाः नयनम् अङ्गीकरोति ।
सा वनकन्या अरुणायाः प्रकोष्ठविवरणं पृच्छति ।
अहं राजकुमारेण प्रेषिता अस्मि ।
इतः साक्षात् अग्रे गच्छतु । तत्र दृश्यते सुसज्जः प्रकोष्ठः ।
निद्रामग्नाम् अरुणां पश्यति वनकन्या । ताम् उभयतः मञ्चस्य उपरि शयानम् आसीत् परिचारिकाद्वयम् ।
विवाहदिनम् उपस्थितम् आदित्यः रक्षकम् आह्वयति
ध्यानं कर्तुं गच्छामि । कोऽपि विघ्नः नोत्पद्येत । सावधानः भवतु ।
आदित्यः अन्तर्दृष्ट्या कञ्चन सर्पम् अपश्यत् । समीपे पिच्छम् अपि ....
... एषः गरुडरूपेण परिवृत्तः भवति । सर्पः अदृश्यः भवति ।
किम् इयं पूर्व-सूचना कापि ?

कोऽपि सव्याकुलः द्वारध्वनिं करोति ।
कः भवितुम् अर्हति ?
आदित्यः द्वारम् उद्घाटयति ।
रामसिंह ! का वार्ता ? राजा कुशली खलु ?
सः तु कुशली एव श्रीमन् ! किन्तु अरुणा ...
... तस्याः प्रकोष्ठः धूमेन आवृतः अस्ति ।
आदित्यः पिच्छं स्वीकृत्य स्वस्य उष्णीषे संयोजयति ।
रामसिंह ! अरुणायाः आवासं गच्छाव ।
अरुणायाः प्रकोष्ठस्थः धूमः वृत्ताकारेण भ्रमन् सर्परूपं प्राप्नुवन् अस्ति । किञ्चिदिव महिलामुखम् अपि भासते । ताभ्यां शय्यायां पतिता अरुणा दृश्यते ।
तस्याः केशाः अव्यवस्थिताः सन्ति । सा निश्चलदृष्ट्या आदित्यं पश्यति ।
अरुणे ! का एषा स्थितिःभवत्याः ?

निश्चेष्टायाः अरुणायाः दर्शनेन आदित्यः विस्मितः भवति । सा रूक्षा जाता अस्ति । आभूषणैः विहीनायाः तस्याः केशाः इतस्ततः विकीर्णाः सन्ति ।
सर्पः !! नागबन्धुः आदित्यं मारयिष्यति ।
अरुणायाः दुःस्थितेः वार्तां श्रुत्वा राजा महेन्द्रवर्मा धावन् आगतः ।
अरुणे ! एषः भवत्याः विवाहदिवसः । उत्थाय सज्जा भवतु भवती ।
केनापि एतस्याः मतिभ्रान्तिः कृता अस्ति ।
सावधानः भवतु । परिचारिकयोः जागरणस्य अनुक्षणं मां सूचयतु । इदानीं राज्ञा सह गच्छामि ।
अस्तु, प्रभो !
तस्याः क्लेशं न जनयेम । स्वल्पे समये अतीते स्वयम् एव पूर्ववत् भवेत् सा ।
तथैव आशास्महे ।
रामसिंह ! कस्यचित् द्वारा राजगुरुं ज्योतिषिकं च अत्र आगन्तुं सूचयतु ।
अस्तु श्रीमन् !
यदा रामसिंहः ततः निर्गच्छति ।...
आदित्य ! अद्य विवाहः न सम्पद्यते इति भाति ।
राज्याभिषेकोत्सवम् अपि स्थगयाम किम् ?

अरुणायाः एका परिचारिका जागरिता भवति ।
अहो ! दीर्घकालं प्रसुप्ता आसम् इति मन्ये ।
रेखे, उत्तिष्ठतु, कियन्ति कार्याणि सन्ति !
राजकुमारी किं चिन्तयेत् ?
राजकुमारीं दृष्ट्वा ते उभेऽपि मूकविस्मिते भवतः ।
निश्चला प्रतिमा इव एषा किं पश्यति ?
क्षाम्यतु । बहुकालं सुप्तवत्यौ आवाम् ।
राजकुमारि ! आदिश्यताम् किं करणीयम् आवाभ्याम् ?
राजकुमार्या किमपि उत्तरं न दीयते ।
वैचित्र्यम् एतत् !
माला रक्षकस्य समीपं गच्छति ।
राजकुमारी जागरिता किम् ? मया राजकुमारः सूचनीयः अस्ति ।
आम् । किन्तु...
माले ! भवती गत्वा राजकुमारं सूचयतु ।
यथा सा किमपि वदेत् तथा प्रयासं करोतु ।
गच्छन्ती माला रामसिंहेन मिलति ।
श्रीमन् ! अत्र किं प्रवर्तमानम् अस्ति ?
माले ! समयः अत्यल्पः अस्ति । विवाहस्य स्थगनं कृतम् अस्ति ।
विवाहः स्थगितः ! किमर्थम् ?
किं वदन्ती अस्ति माले ? राजकुमारी मतिभ्रान्तिप्रभावे अस्ति ?
नागबन्धुः आदित्यं हनिष्यति ।
अनुवर्तते

कुरुक्षेत्रीयः महोत्सवः

हरियाणाराज्यस्य कुरुक्षेत्रं कारणद्वयतः स्मर्यते लोकेन । प्रथमं कारणं तु - अष्टादश दिनानि यावत् प्रवृत्तं कौरवपाण्डवयोः युद्धम् । अपरं च - तत्र प्रवृत्तः गीतोपदेशः । यदा युद्धारम्भसूचनारूपेण उभयपक्षीयैः अपि नायकैः शङ्खोद्घोषः कृतः तदा अर्जुनस्य मनसि प्रश्नः उद्भूतः यत् अहं भीष्मद्रोणादीन् गुरून् एतान् कथं हन्तुम् अर्हामि इति । ततः सः क्लैब्यं प्राप्य रथे उपाविशत् । अनन्तरं कृष्णः तं कर्तव्यम् उपादिशत् । तत् एव गीतोपदेशत्वेन ख्यातम् अभवत् । एतस्याः गीतायाः जन्मभूमिः अस्ति एतत् कुरुक्षेत्रम् । तस्मात् एव गीताजयन्तीं निमित्तीकृत्य अत्र सप्ताहात्मकः कार्यक्रमः प्रवर्तते । एतस्मिन् वर्षे स च उत्सवः डिसेम्बर्मासे प्रथमदिनाङ्कात् सप्तमदिनाङ्कपर्यन्तं प्रवर्तिष्यते । समग्रात् देशतः आगताः सहस्रशः जनाः सम्मिलन्ति अत्र । एतस्य उत्सवस्य काले कुरुक्षेत्रं प्रति गमनं सांस्कृतिकम् आध्यात्मिकं च अनुभवं ददाति इति भावयन्ति जनाः ।

परमपवित्रग्रन्थत्वेन भाव्यते भगवद्गीता । सा बोधयति यत् जीवनपद्धतिः पूजापद्धतिः च या कापि भवेत् चेदपि शुद्धेन मनसा सर्वेषाम् अपि हितं यः चिन्तयति सः एव उत्तमः इति ।

कुरुक्षेत्रे स्थिते ब्रह्मसरोवरे सन्नेहितसरोवरे च क्रियमाणं स्नानं पुण्यप्रदम् इति जनाः भावयन्ति । अत्र सप्त दिनानि अपि भगवद्गीतापारायणं प्रचलति । शिक्षणविषये चर्चा, महाभारतकथानां श्रावणं, पारम्परिकं नृत्यं, महाभारतकथासम्बन्धिनां रूपकाणां प्रदर्शनम् इत्यादिकम् अपि प्रचलति अत्र ।

भगवान् बुद्धः, दशापि सिक्खगुरवः च एतं प्रदेशं प्रति पूर्वम् आगताः आसन् इति तु एतस्य प्रदेशस्य अपरं वैशिष्ट्यम् ।

न्यूट्रिन्स्पर्धा - ३

उत्तराणि

१. (आ) मध्यप्रदेशः ।

२. (अ) नर्मदा ।

पुरोऽयं भवताम् पुरोऽयं भवताम्

भवदर्थकं विज्ञानम्

मण्डूके वर्णमयता

यदि मानवेषु कश्चित् रक्तनेत्रः भवेत् तर्हि जनाः तत्समीपं न गच्छेयुः एव, साङ्क्रामिकेण नेत्ररोगेण पीडितः स्यात् अयम् इति चिन्तयन्तः । मण्डूकः यदा रक्तनेत्रः भवति तदा अपि अन्ये जन्तवः एवमेव व्यवहरन्ति । मानवमण्डूकयोः भेदः नाम मण्डूकः अन्यजन्तूनां निवारणाय एवं व्यवहरति ।

रक्तनेत्रतार्हः मण्डूकः केन्द्रामेरिकापरिसरे वृष्टिबहुले अरण्ये वृक्षेषु निवसति । शत्रुभ्यः रक्षणाय दैवेन तस्य शरीरस्य नेत्रयोः च वर्णमयत्वं कल्पितम् अस्ति । नीलमिश्रितः हरितः वर्णः तस्य शरीरस्य । नेत्रयोः कस्मिंश्चित् पार्श्वे पीतवर्णरेखा भवति । तृतीया भ्रूः अपि भवति एतस्य शरीरे । निमीलनात् विना एव नेत्ररक्षणं करोति एषा भ्रूः ।

एषः विशिष्टः जीवी शत्रुषु भीतेः उत्पादनाय आत्मरक्षणाय च एतां वर्णमयतां उपयुङ्क्ते । शरीरस्य वर्णमयताकारणतः वृक्षपरिसरे एषः विशेषतः शोभते । प्रौढजीवनम् एषः प्रायः यापयति वृक्षस्य उपरि एव । निसर्गे यथा यथा सान्द्रता शुभ्रता च दृश्यते तथा तथा एतस्य शरीरे अपि यथापरिसरं वर्णपरिवर्तनं दृश्यते ।

भवतां परिसरः

शाकवर्धने विक्रमः

प्रतिवर्षं शतशः कुष्माण्डवर्धकाः आत्मना वर्धितस्य विशिष्टस्य कुष्माण्डस्य प्रदर्शनाय सम्मिलन्ति जागतिके स्तरे । ते सर्वे चिन्तयन्ति यत् मया वर्धितं कुष्माण्डम् एव पारितोषिकार्हं भवेत् इति । ओरेगान्देशीयः स्टीव्डाल्टाटसः ३२८ किलोमितस्य फलस्य वर्धनेन जागतिकं विक्रमं साधितवान् अस्ति ।

लाङ्ग्-ऐल्याण्ड्प्रदेशे प्रवृत्तायाः कुष्माण्डस्पर्धायाः आयोजकः आन्द्रोव्सबिनः वदति यत् महाकुष्माण्डस्य वर्धनं न हि सरलम् इति । एतदर्थं समर्पणभावः, महान् परिश्रमः च अपेक्षितः भवति । प्रतिदिनं तस्य व्यवस्थापरिशीलनम् अपि अत्यावश्यकम् ।

जगति अतिमहतः गृञ्जनकस्य भारः ९ किलो, तादृशस्य एव सेवफलस्य भारः भवति २ किलोमितः, तादृशस्य एव क्याबीजशाकस्य भारः भवति ५६ किलोमितः ।

पुरोऽयं भवताम् पुरोऽयं भवताम्

भवन्तः जानन्ति किम् ?

हिक्का

हासः किञ्चन उत्तमम् औषधम् । एषु दिनेषु 'हासचिकित्सा' इति वचनम् आधिक्येन श्रूयते । एषा चिकित्सा मनसः भारम् अपाकरोति । यथा अधिकस्य आहारस्य सेवनम् अनानुकूल्याय भवति तथा एव अधिकः हासः अपि कष्टाय एव । यदा हासाधिक्यं भवति तदा शरीरमध्ये निग्रहशैथिल्यं जायते । ततश्च सङ्कोचः, वाचिकाङ्गे शीघ्रस्पन्दः च सम्पद्यते । तस्मात् हिक्कायाः उत्पत्तिः । समीचीनः श्वासनिग्रहः हिक्कानिवारणाय स्थितः सरलः मार्गः । एतस्मात् अङ्गाराम्लवायुः शरीरे सङ्गृहीतः भवति । एषः वायुः हिक्कोत्पत्तिं निगृह्णाति । अमेरिकादेशीयः लोवाप्रदेशीयः चार्ल्स् ओस्बर्न्वर्यः प्रतिनिमेषं ४६ हिक्कां कुर्वन् ६९ घण्टाः यावत् निरन्तरं हिक्कितवान् । एषः एव जागतिकः विक्रमः ।

अभिवर्ध्यतां ज्ञानशक्तिः

उक्तीनां स्मरणस्य द्वारा वयम् अत्र महापुरुषान् कांश्चन स्मराम

१. 'अन्तः निहिता परिपूर्णता विद्याभ्यासतः प्रकाश्यते' इति कः उक्तवान् ?

२. 'शक्तिः प्राप्यते न शरीर-सामर्थ्यात्, प्रत्युत अचलात् आत्मविश्वासात्' इति केन उक्तम् ?

३. 'दुर्बलस्य क्षमा सर्वदा अकिञ्चित्करी । शक्तिमतः आयुधं भवति सा' इति वचनं कस्य ?

४. 'क्रीडास्फूर्तिः अवश्यं भवेत् क्रीडायाम्' इति केन उपदिष्टम् ?

५. 'मस्तिष्कस्य कस्मिंश्चित् कोणे संरक्ष्य स्थापयितुम् अर्हं न भवति ज्ञानम्' इति कः अवदत् ?

(उत्तराणि ६६ तमे पृष्ठे)

न्यूट्रिन्स्पर्धा - ३

एतस्याः सञ्चिकायाः अन्तिमावरणपृष्ठे स्थिता न्यूट्रिन्विज्ञापिका दृश्यताम् । तत्र 'न्यूट्रिन्' इत्येतत् पदं कियद्वारम् आगतम् इति गणयित्वा तां सङ्ख्यां कागदखण्डे विलिख्य **डिसेम्बर्मासस्य ३१ तः पूर्वं** **CHANDAMAMA INDIA LIMITED** No. 82, Defence Officers Colony, Ekkatuthangal, CHENNAI - 600 097 इत्यस्मै सङ्केताय प्रेष्यताम् ।

आकर्षकं पारितोषिकं* प्रतीक्षते भवन्तम्

*Conditions apply

nutrine India's largest selling sweets and toffees.

चित्रशीर्षिकास्पर्धा

अधस्तनं चित्रद्वयं दृष्ट्वा परस्परसम्बन्धिना वाक्यद्वयेन चित्र-
शीर्षिकां किं भवन्तः प्रेषयितुं शक्नुयुः ?

KALANIKETAN BALU

KALANIKETAN BALU

समपत्रे लिखिता चित्रशीर्षिका अधस्तनसङ्केताय प्रेषणीया -

चन्दमामा (संस्कृतम्) 'अक्षरम्' ८ उपमार्गः, गिरिनगरम्, बेङ्गलूरु - ५६००८५

योग्या शीर्षिका एतन्मासस्य २५ तः पूर्वं प्रेषणीया । सर्वश्रेष्ठायै शीर्षिकायै रू.१००/- पुरस्काररूपेण दास्यन्ते । पुरस्कृता शीर्षिका मासद्वयानन्तरं प्रकाशयिष्यते ।

अभिनन्दनानि

'डिसेम्बर्'मासस्य शीर्षिकाप्रेषिका -
कु. प्रतिमा
द्वारा - श्री रत्नाकर बारीक, बुकुरामुण्डा
बादिकटा, पद्मपुरम्,
बरगढ - ७६८ ०३६

पुरस्कृता शीर्षिका

यानं चालयामि इत्येषाशा ।
पयः पातुं न शक्नोत्येषा ।।

अभिवर्ध्यतां ज्ञानशक्तिः - उत्तराणि

१. स्वामी विवेकानन्दः ।
२. महात्मना गान्धिवर्येण ।
३. रवीन्द्रनाथठागोरवर्येण ।
४. जवहरलालनेहरूवर्येण ।
५. डा० एस्. राधाकृष्णन् ।

Printed and Published by B. Viswanatha Reddi at B.N.K. Press Pvt. Ltd., Chennai - 26 on behalf of Chandamama India Limited, No. 82, Defence Officers Colony, Ekkatuthangal, Chennai - 600 097. Editor : B. Viswanatha Reddi (Viswam)

पाकशालायाम् अनिलस्य सञ्चयः कथम् ?

वृन्दायाः महती समस्या नाम पाकानिलकोषे अनिलः समाप्तप्रायः इति । अनिलवितारकः उक्तवान् आसीत् यत् सप्ताहात् पूर्वम् अपरस्य अनिलकोषस्य प्राप्तिः असम्भवा इति । प्रतिदिनं तया पत्ये, पुत्राय, श्वश्रूश्वशुरयोः च कृते पाकः सज्जीकरणीयः भवति स्म पार्थक्येन । तस्याः मातुलानी पतिसहिता आगता आसीत् अपि । अनन्यगतिकतया स्वसमस्या यदा निवेदिता तदा मातुलानी अवदत् – ''भवती चिन्तां मा करोतु । अहं पाकशाला-दायित्वं निर्वक्ष्यामि'' इति ।

मातुलान्या पाकशालादायित्वं स्वीकृतम् । तत् दिनं तु निरातङ्कं गतम् । अनन्तरदिने अपि अनिलविषये अप्रिया वार्ता न श्रुता एव । एतस्य रहस्यं मातुलानीम् अपृच्छत् वृन्दा । तदा मातुलानी अवदत् – ''अनिलस्य सञ्चयाय यद्यत् करणीयं तत्सर्वं कृतं मया । भवत्याः गृहे चतुर्विधाः पाकाः सज्जीकरणीयाः भवन्ति । पार्थक्येन पाकं कुर्वती भवती अनिलव्ययम् अधिकं करोति स्म । मया एतत् निवारितम् । भवत्याः पाकशालायां स्थिता महाबाष्पस्थाली मया उपयुक्ता । अन्न-शाक-दालादयः युगपत् एव पक्वीकृताः मया । विभिन्नेषु पात्रेषु संस्थाप्य मया एतत् कार्यं साधितम् । भवत्या एवं न क्रियते स्म । अतः कृतस्य पाकस्य उष्णीकरणाय पुनः चुल्लेः उपयोगः करणीयः भवति स्म । सर्वे यदि युगपत् भोजनाय उपस्थिताः भवेयुः तर्हि पौनःपुन्येन उष्णीकरणस्य आवश्यकता अपि न भवेत् । एवम् अनिलसञ्चयाय सन्ति केचन उपायाः'' इति ।

''अहो, एते अतीव सरलाः उपायाः !! मया इतः पूर्वम् एते न आश्रिताः आसन् । इतः परम् अहम् एतेषाम् आश्रयणं करिष्यामि । सकृत् एव पाकानां सज्जीकरणे प्रयासः, युगपत् एव भोजनाय व्यवस्था च अनिलव्ययं न्यूनीकरिष्यति इति तु सत्यम्'' इति अवदत् वृन्दा ।

CHANDAMAMA (Sanskrit) Dec. 2006 RNI No. 42664/85. Regd No. TN/CC(S)Dn/158/06-08
Licensed to post WPP - Inland No. TN/CC(S)Dn/82/06-08, Foreign No. 83/06-08